
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

१६८

।।सिद्धांत बिंदु।।ध।।पान २८

Acc. No. ~~156~~ M-1787
Title - सिद्धान्त बिन्दु
Author - मधुसूदन सरस्वती
Date - ?
Subject - वेदान्त
folio - 28.
Xerox - 55.

॥श्रीगणेशायनमः॥श्रीशंकराचार्यनवावतारंविश्वेश्वरंविश्वगुरुंप्र
णम्य॥वेदांतशास्त्रश्रवणालसानांबोधायकुर्वेकमपिप्रबंधं॥१॥इह
खलुसाक्षात्परंपरयावासर्वानिवजीवान्समुद्दिधीर्षुःश्रीमद्भगवान्श्री
मच्छंकराचार्योनात्मभ्योविवेकेनात्मानंनित्यशुद्धबुद्धमुक्तस्वभावंसंक्षेप
णबोधयितुंदशश्लोकींप्रणिनायनन्विदंकारास्पदेभ्योऽनात्मभ्योविवेके
नाहंकारास्पदमात्मानंसर्वोलोकोऽहमस्मीतिप्रत्येतिदुःखंचानुभवतिते
नज्ञातज्ञापकत्वान्निःप्रयोजनत्वाच्चआत्मप्रतिपादनंव्यर्थमितिचेन्न॥
चिद्भास्यत्वेनलक्षणेनइदंकारास्पदानामपिदेहेंद्रियमनसांप्रतिभासतोऽ
हंकारास्पदत्वेनतदविवेकात्तेनशुद्धस्याप्यात्मनिदुःखित्वाद्यभिमानाच्छास्त्री
येणैवब्रह्मास्मीत्यैक्यज्ञानेनसमूलस्यतस्यानिवृत्तेःतस्मादज्ञातज्ञापकत्वात्सप्र
योजनत्वाच्चात्मतत्त्वप्रतिपादनंनव्यर्थं।तस्यचात्मतत्वस्यतत्वमस्यहंब्रह्मा.

४५

१

स्मीत्यादिवेदांतमहावाक्यमेवप्रमापकं॥वाक्यंचपदार्थज्ञानद्वारैवबोधकमि
तितत्त्वंपदार्थयोःप्रकृतवाक्यार्थानुकूलयोरन्यतोसिद्धत्वाभावेपिशास्त्रे
णैवप्रमातव्यौ।यूपाहवनीयादिपदार्थवत्॥तत्रयतोवाइमानिभूतानि
जायंतेयेनजातानिजीवंतीत्यादिसृष्ट्यादिश्रुतयस्तत्पदवाच्यार्थस्यस
मर्पिकाः।सत्यंज्ञानमनंतंब्रह्मेत्यादयस्तल्लक्ष्यार्थस्यैव।तद्यथामहामत्स्य
उभेकूलेनुसंचरतीत्यादयस्तुजाग्रत्स्वप्नसुषुप्त्यादिश्रुतयःतथाहमस्मीत्या
उभेकूलेनुसंचरतीत्यादयःजाग्रत्स्वप्नसुषुप्तांतं चरति यद्दा
पूर्वंचापरंचैवमेवायंपुरुषएतावुभावंतावनुसंचरतीतिस्वप्नांतंबुद्धांतं च
त्वंपदवाच्यार्थस्यसमर्पिकाः॥योयंविज्ञानमयःप्राणेषुहृद्यंतर्ज्योतिःपुरुषः।
नदृष्टेर्द्रष्टारंपश्येरित्यादयस्तुलक्ष्यस्य।तेनप्रथममवांतरवाक्याभ्यामनुभूतयोः
शुद्धजीवब्रह्मणोरखंडत्वमस्यादिवाक्येमुख्यार्थान्वयानुपपत्तेर्लक्षणयानिर्वि
कल्पकस्मरणोपपत्तेः।सुषुप्तौनिर्विकल्पकसाक्षिचैतन्यानुभवांगीकाराच्च।
अद्वितीयब्रह्मविजिज्ञापयिषयाप्रवृत्तानांसत्यज्ञानादिपदानांमुपाधिवि
शिष्टचैतन्यशक्तत्वेपिचैतन्यमात्रेतात्पर्येणसंस्कारोद्बोधाच्च।इच्छंतिहिआ

यद्दा पूर्वंचापरंचैवमेवायंपुरुषएतावुभावंतावनुसंचरतीतिस्वप्नांतंबुद्धांतं च

क्तात्रापदादपिनिर्विकल्पकंतात्पर्याधीनत्वाच्छब्दप्रवृत्तेः एते नप्रमितिप्रमा
त्रोर्महावाक्यार्थबोधेध्यानमप्यपास्तमसंप्रज्ञातसमाधेः श्रुतिस्मृतिसिद्ध
त्वाच्च इतिपारोक्ष्यसह्याभ्यांचनतत्वंपदार्थानुभववादेवस्रुतहस्यत॥ वाच्या
र्थस्यचभेदावभासान्नपौनरुक्त्यं। लक्ष्यार्थस्यचैकत्वादखंडार्थता। पदजन्य
स्मरणस्यनिर्विकल्पकवाक्यार्थानुकूलस्यनिर्विकल्पकत्वमनुभवादेवावि
रुद्धं। सविकल्पकवाक्यार्थबोधेचसविकल्पकपदार्थोपस्थितिरंग॥ प्रकृते
चानिर्विकल्पकोवाक्यार्थबोधः तस्यैवप्रमात्वेनाज्ञाननिवृत्तिसामर्थ्याद्दि
तानलक्ष्यतावच्छेदकमंतरेणलक्षणानुपपत्तिः। प्रकृतवाक्यार्थानुकूलपदार्थो
पस्थितेरेवशक्तिलक्षणासाध्यत्वादिति। ननुतर्हिवेदांतवाक्येभ्यएवपदा
र्थोपस्थितौवाक्यार्थबोधेचसतितस्यस्वतएवप्रामाण्यात्। तेनाज्ञानत
त्कार्यनिवृत्त्युपपत्तौ किंविचारेणेतिचेत्। सत्यं। वेदांतायद्यपिस्वतःप्रामा

ण्यान्निर्विकल्पकं आत्मसाक्षात्कारं जनयंतितथापितस्यमंदबुद्धीनांबादिवि
प्रतिपत्तिजनितसंशयप्रतिबंधेनाज्ञाननाशकत्वासामर्थ्याद्विचारेणतत्सं
शयनिवृत्तौनिरपवादं अज्ञानादिनिवृत्तिरितिसंशयबीजभूतवादिवि
प्रतिपत्तिनिराकरणार्थंविचारआरभ्यते। तत्रत्वंपदार्थेविप्रतिपत्तयःप्रथमं
प्रदर्श्यंते। तत्पदार्थस्यशास्त्रतात्पर्यविषयतयाभ्यर्हितत्वेपित्वंपदार्थस्य
शास्त्रफलमोक्षभागितयाततोप्यभ्यर्हितत्वात्। तत्रदेहाद्याकारपरिणतानि
चत्वारिभूतानीतिचार्वाकाः। चक्षुरादीनिप्रत्येकमित्यपरे। मीलितानीत्यपरे।
मनइत्यन्ये। प्राणइत्येके। क्षणिकविज्ञानमितिसौगताः। शून्यमितिमाध्यमि
काः। देहेंद्रियातिरिक्तोदेहपरिमाणइतिदिगंबराः॥ कर्ताभोक्ताजडोविभुरिति
वैशेषिकतार्किकप्राभाकराः। जडबोधात्मकइतिभाट्टाः। भोक्तैवकेवलोबो
धात्मकइतिसांख्याः। पातंजलाश्च। अविद्ययाकर्तृत्वादिभाक्परमार्थतोनि
र्धर्मकःपरमानंदबोधएवेतिऔपनिषदाः। एवंसामान्यतोहंप्रत्ययसिद्धेचि

२

दात्मनिवादिविप्रतिपत्तिभिः संदिग्धेहं प्रत्ययस्यालंबनविशेषनिर्णयाय।
हभगवानाचार्यः॥ नभूमिर्नतोयंनतेजोनवायुर्नखंनेंद्रियंवानतेषांस
मूहः॥अ नैकांतिकत्वात्सुषुप्त्यैकसिद्धस्तदेकोवशिष्टः सिवः केवलोहं॥१५
अस्यार्थः॥ अहमहं प्रत्ययालंबनमेकोऽद्वितीयः। अवशिष्टः सर्वद्वैत
बाधेप्यबाधितः शिवः परमानंदबोधरूपः तस्यैव मंगलरूपत्वात्। के
वलोनिर्धर्मस्तिनाद्वितीयः सर्वप्रमाणाबोध्यः परमानंदबोध एवाहंप्रत्य
यालंबनमित्यौपनिषदः पक्षएषांश्लोकानामित्यर्थः एतदुपपादनायेतर
वादिमतानिनिराकरिष्यन् प्रथमं देहात्मवादंनिराकरोति। नभूमिर्नतो
यंनतेजोनवायुर्नखमिति। अत्राहमितिसर्वत्रप्रत्येकंनत्रासंबध्यते।
याभूमिः सोहंनभवामियोहंसाभूमिर्नभवतीतिवापरस्परतादात्म्याभावो
द्रष्टव्यः यद्यपिवादिनाप्रत्येकंभूम्यादेरात्मत्वंनाभ्युपगतंसंघातस्यैवत
दभ्युपगमात् तथापितन्मतेतत्वचतुष्टयमंगीकारात्संचमतत्वाभ्युपगमप्रस

२

गेनचसंयोगादिसंबंधानभ्युपगमात् हेतुरभावाच्चसंघातोनोपपद्यते इति त१
अभिप्रेत्यप्रत्येकभूतनिराकरणेनभौतिकदेहात्मवादोनिरास्तः यद्यपिभू
तचतुष्टयतत्त्ववादिनोमते आवरणाभावत्वेनाभिमतस्यास्थिरस्यासत आ
काशस्यदेहानुपादानत्वं। तथापि सिद्धांततस्यभावत्वेदेहोपादानत्वाद्यंगीका
रात् अत्राप्यात्मत्वप्रसक्त्यातन्निराकृतं। अथवानवायुरित्यंतमेवदेहात्मवा
दस्यनिराकरणं। नखमितितुशून्यवादस्यखशब्दस्यशून्यवाचकत्वात्। नें
द्रियमितिप्रत्येकमिंद्रियाणांमोक्षत्वनिरासः। नतेषांसमूहमितिमिलितानां
भूतानांदेहावयव्याकारेणपरिणतानांनोइंद्रियाणांचमीलितानांनिरासः पूर्वसं
घातमनभ्युपगम्यप्रत्येकंभूतानिनिराकृतानि अधुनासंघातमभ्युपगम्यापि
निराकृतानीतिभेदः भूतनिराकरणेनभौतिकयोः प्राणमनसोर्निरासः मनोनि
रासेनचमनोवृत्तेः क्षणिकविज्ञानस्यदेहातिरिक्तस्यकर्तृत्वभोक्तृत्वादिविशि
ष्टस्यनिरासः सिद्धांतेज्ञानेच्छासुखदुःखादीनामंतःकरणाश्रयत्वाभ्युपगमात्
कामादीन्प्रकृत्यएतत्सर्वंमनएवेतिश्रुतेः तेनदेहमारभ्यकेवलभोक्तृपर्यंतानां

सिद्धांतबिंदु।

४

त्वद्वाद्यभ्युपगतानामनात्मत्वं प्रतिज्ञातं भवति। तत्र हेतुमाह अनैकांतिकत्वादि
तिव्यभिचारित्वाद्विनाशित्वादितियावत्। आत्मनो देशकालापरिछिन्नानां घट
दिवदनात्मत्वात्तद्ध्वंसप्रागभावयोश्च ग्रहीतुमशक्यत्वात्। अनात्मनां जडत्वा
त्तद्भिन्नस्य चात्मत्वाभावादात्मन एकत्वेपि सुखदुःखाद्याश्रयाणामंतःकरणा
नां भेदाभ्युपगमोऽव्यवस्थोपपत्तेः स्वेनैव स्वाभावग्रहविरोधान्न ग्राहककाले ग्राह
कासंभवात्। ग्राहकसत्वे ग्राह्याभावात्। कृतहान्यकृताभ्यागमप्रसंगाच्च।
न तस्य ध्वंसप्रागभावौ। सद्रूपस्यात्मनः सर्वत्रानुगमाच्च नात्यंताभावसंभ
वः। द्वैतस्य मिथ्यात्वेन तत्तादात्म्यापन्नतयैव शुक्तिरजतादिवत् अध्यस्तत्वेन
तादात्म्याभावानुपपत्तिः। तेनात्मानात्माभावप्रतियोगी। अभावप्रतियोगिन
श्च देहेंद्रियादयस्तनामीनात्मानः। किंतु स्वप्रकाशबोधरूपे आत्मनि अद्वैते
प्यनिर्वचनीयानाद्यविद्याकल्पिता अनिर्वचनीया एवेति सिद्धांतरहस्यं। ननु
बोधरूप आत्मेति तत्त्वाभ्युपगमात् सुषुप्तौ च बोधाभावाद्गाढमूढोहमासं

छिन्नत्वात्त पेरि २

हणा५

४

चि॰ २
सिद्ध॰ २

नकिंचिदवेदिषमितिसुषुप्तोत्थितस्यपरामर्शःकथमव्यभिचारितात्स्येत्याशंक्याह।
सुषुप्त्यैकेइति अयमर्थः। आत्मनः। सुषुप्तिसाक्षित्वान्नतुतत्रतदभावः अन्यथा
मूढोहमासमितिपरामर्शानुपपत्तेः मातमानामितिप्रमेयानांव्यभिचारित्वे
पितद्भावाभावसाक्षिणः कालत्रयेप्यव्यभिचारात् ननुप्रमाश्रयः प्रमातास
र्वकर्त्तभोक्ताप्रदीपवत्स्वपरसाधारणसर्वभासकश्चेतिनघटादिवत्सा
क्षिसापेक्षइतिचेत्। न। विकारित्वेनस्वविकारसाक्षित्वानुपपत्तेः दृश्यस्य द्र
ष्टृत्वाभावात्प्रमातुश्चपरिणामित्वेन दृश्यत्वात्एकस्यकूटस्थस्यैवसर्वसा
क्षित्वात् एकः कूटस्थोनिर्धर्मकः साक्षिनाद्रीयतेऽप्रामाणिकत्वादितिचेत्। न।
तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातिनदृष्टेर्द्रष्टारंपश्येः अ
दृष्टोद्रष्टानान्योतोस्तिद्रष्टेत्यादिवदंतावेदांतप्रमाणराजेनतस्यैवसर्वसा
क्षित्वेनाभिषिक्तत्वात् ननुमहदेतदिंद्रजालंप्रमाश्रयानकूटस्थान्विहाय
कूटस्थमप्रमाश्रयमेवप्रमाणराजः सर्वसाक्षिणंकरोतीति। बाढमिंद्र
जालमेवैतत्स्वप्नवदविद्याविलासितत्वात्। तथापिदृश्यस्यघटादिवज्जडत्वेन

कथंप्रमाश्रयत्वमितिचेत्॥न।दर्पणादिवत्स्वच्छत्वेनचित्प्रतिबिंबग्राहक
त्वाच्चैतन्यतादात्म्याध्यासात्॥ननुनीरूपस्यनिरवयवस्यकथंप्रतिबिंब
इतिचेत्।कात्रानुपपत्तिर्विभ्रमहेतूनामविचित्रत्वात्जपाकुसुमरूपस्य
नीरूपस्यनिरवयवस्यापिस्फटिकादौप्रतिबिंबदर्शनात्शब्दस्यापि
प्रतिशब्दाख्यप्रतिबिंबोपलंभात्।तयोःसंप्रतिपन्नप्रतिबिंबवैलक्षण्या
निरूपणात्तथापींद्रियग्राह्यस्यैवप्रतिबिंबइतिचेत्।न।व्यभिचारात्।अ
नींद्रियग्राह्यस्यसाक्षिप्रत्यक्षस्याकाशस्यापिजलादौप्रतिबिंबोपलंभात्।
अन्यथाजानुमात्रेपिउदकेअतिगंभीरप्रतीतिर्नस्यात्।प्रतिबिंबस्यसाक्षि
भास्यत्वेप्यधिष्ठानग्रहणार्थंचक्षुषोऽपेक्षणात्एतेननीलंनभइत्यादिविभ्र
मेपिचक्षु[illegible]यव्यतिरेकौव्याख्यातौ।तत्रसालोकस्याकाशस्याधिष्ठानत्वा
त्साक्षात्चाक्षुषप्रतिबिंबमेवरूपसापेक्षं।नान्यदित्यवधेयं।तथाप्यात्मनः प्र
तिबिंबेकिंमानमितिचेत्रूपंरूपंप्रतिरूपोबभूवतदस्यरूपंप्रतिच
क्षणाय।मायाभासेनजीवेशौकरोतीत्यादिश्रुतेः एकधाबहुधाचैवदृश्यते

५

स्य ४

जलचंद्रवदित्यादिस्मृतिः सएषइहप्रविष्टः सएतमेवसीमानंविदार्यैतयाद्वा
राप्रापद्यततत्सृष्ट्वातदेवानुप्राविशदित्यादिश्रुतेश्च सर्वाण्यन्यथानुपपत्तिः
आभासएवच। अतएवचोपमासूर्यकादिवदित्यादि पारमर्षसूत्राणि चत
त्रमानानितस्यचप्रतिबिंबेसत्यत्वमेवेतिप्रतिबिंबवादिनः मिथ्यात्वमेवे
त्याभासवादिनः स्वरूपेतुनविवादएवेत्यन्यदेतत्। अचेतनविलक्षणत्वं
तस्यश्रुतिसिद्धंप्रत्यक्षसिद्धंच। तस्मात्सिद्धमंतःकरणस्यप्रतिबिंबाध्यासे
द्वाराप्रमातृत्वंननुअध्यासोपिनोपपद्यते। तथाहि। आत्मनिवानात्माध्यस्य
ते। अनात्मनि आत्मावा। नाद्यः तस्यनिःसामान्यविशेषत्वेनसर्वदाभास
मानत्वेनसादृश्यादिरहितत्वेनचाधिष्ठानत्वासंभवात्नापिद्वितीयः तस्यामि
थ्यात्वापत्त्युपागमात्मिथ्यावस्तुनोधिष्ठानत्वेशून्यवादप्रसंगात्तस्यचसत्य
त्वेतदनिवृत्तेरनिर्मोक्षप्रसंगाच्च। नहिसत्यंकिंचिन्निवर्त्ततेनिवर्त्यमानंवाज्ञा
नेनश्रुतिश्च। भिद्यतेहृदयग्रंथिश्छिद्यंतेसर्वसंशयाः क्षीयंतेचास्यकर्मा
णितस्मिन्दृष्टेपरावरे। तमेवविदित्वा अतिमृत्युमेतिनान्यःपंथाविद्यते

11

सिद्धांतबिं॰॥ यनाय।तरतिशोकमात्मवित्।ब्रह्मविदाप्नोतिपरं।ब्रह्मवेदब्रह्मैवभवतीत्या
द्याज्ञानात्सर्वसंसारनिवृत्तिंदर्शयंति।तस्यमिथ्यात्वंचसूचयंतिएकमेवाद्वि
तीयंअतोन्यदार्त्तं।नेहनानास्तिकिंचन।अथातआदेशोनेतिनेतीत्याद्याःश्रु
तयःसाक्षादेवमिथ्यात्वंप्रतिपादयंतिदृश्यत्वेनशुक्तिरजतादिवत्मिथ्यात्वा
नुमानाच्च।आत्मन्यध्यस्ततयैवअनात्मनोसिद्धेःतत्रात्माध्यासःअनात्माध्या
सेनचात्मनोदोषसादृश्यादिसंभवात्तत्रानात्माध्यासइतिआत्माश्रयादिदो
षप्रसंगाच्च।एतेनात्मानात्माध्यासस्याविचारकत्वात्नाविकल्प्यावसरस्यप्र
स्तं।स्वप्रकाशात्मन्यविद्याया।अप्यनुपपत्तेःतथाहि।साप्यध्यस्तानध्यस्तावा।
तत्राद्येन्योन्याश्रयादिदोषप्रसंगः।अंत्येतस्याअनुच्छेदादनिर्मोक्षप्रसं
गः।सर्वस्याध्यासमूलत्वेनचात्मप्रमादिव्यवस्थानस्यात्।एकस्यैवात्मनः
प्रमाणप्रमेयप्रमितिप्रमातृस्वरूपताचविरुद्धाऽविरोधाभ्युपगमेवासौगत
मतप्रवेशापत्तिरिति।अत्रोच्यते।अहंमनुष्यःकर्त्ताभोक्तेत्यादिप्रतीतिस्ता
वत्सर्वजनसिद्धासाचनस्मृतिःअपरोक्षावभासत्वात्भेदाग्रहपूर्वकत्वाच्च

नापि प्रमाश्रुतियुक्तिबाधितत्वात्। तथा च श्रुतयः योऽयं विज्ञानमयः प्राणे
षु हृद्यंतर्ज्योतिः पुरुषः अयमात्मा सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदं
ब्रह्म यत्साक्षादपरोक्षाद्ब्रह्म। य आत्मा सर्वांतरः। योऽशनायापिपासे शो
कं मोहं जरां मृत्युमत्येति। स यत्तत्र किंचित्पश्यत्यनन्वागतस्तेन भवति।
असंगो ह्ययं पुरुष इत्याद्याः। अकर्तृत्वभोक्तृत्वे परमानंदब्रह्मरूपतां   मप
आत्मनो दर्शयंति॥१॥ युक्तयश्च विकारिणः परिच्छिन्नत्वेनानात्मत्वापत्तेः
स्वस्य ७ स्यैवैकग्रहणे कर्मकर्तृविरोधात्। दृग्दृश्यसंबंधानुपपत्तेर्भेदेनाभेदेन वा   दे
धर्मधर्मिभावानुपपत्तेश्च। ज्ञानानित्यत्वपक्षे तत्तद्व्यक्तिभेदध्वंसप्रागभा
वसमवायज्ञानत्वजात्याद्यभ्युपगमे गौरवात्। एकत्वाभ्युपगमे चातिला
घवात्। घटज्ञानं पटज्ञानमित्युपाधिभेदपुरस्कारेण ज्ञानभेदप्रतीतेः
वस्तुतस्तु ज्ञानं ज्ञानमित्येकरूपावगमात्तदुत्पत्तिविनाशाप्रतीत्योश्च वस्य
५२ कल्प्यविषयसंबंधविषयतयाप्युपपत्तेरुपाधिपरामर्शमंतरेण स्वत एव घटात्।
घटोत्तरस्य भेदप्रतीतिः स्यात्प्रतिबंदीग्रहासंभवादाकाशकाल दिशामपि ना

सिद्धांतबिंदु॥

७

नात्मापत्तेश्च कर्तृत्वादेर्वस्तुत्वेऽनिर्मोक्षप्रसंगात्। स्वप्रकाशानभ्युपगमे च जगदांध्यप्रसंगात्। परमप्रेमास्पदत्वेन च तस्यानंदरूपत्वा॰ निर्द्धर्मकनित्यस्वप्रकाशसुखात्मक एवात्मेत्यादयः। तस्मात्पारिशेषाद्भ्रांतिरियमिति स्थिते तत्कारणमपि योग्यं किंचित्कल्पनीयं कल्प्यमानं च तदद्वितीयात्मनि अध्यस्ततयैव धर्मिग्राहकमानेन सिद्धमहं न जानामीति साक्षिप्रतीतिसिद्धं अनिर्वाच्यं अज्ञानमेव न च तदभावरूपं ज्ञानस्यानित्यत्वेन तदभावानुपपत्तेरिष्टत्वात्। धर्मिप्रतियोगिज्ञानाज्ञानाभ्यां च व्याघातापत्तेः नापि भ्रमसंशयतत्संस्कारपरंपरारूपं। अपरोक्षत्वात् अतीतानागतभ्रमसंशयतत्संस्काराणां च परोक्षत्वेनाज्ञानमस्फुटत्वात्। आवरणात्मकत्वादज्ञानमात्रमुपादानत्वाच्चात्मनो निर्विकारत्वादतः कारणादेव जन्यत्वात्। देवात्मशक्तिं स्वगुणैर्निगूढामिति गुणवत्त्वश्रुतेश्च। मायां तु प्रकृतिं विद्यात्। इंद्रो मायाभिः पुरुरूप ईयते। अनृतेन हि प्रत्यूढा नीहारेण प्रावृता भूयश्चांते विश्वमायानिवृत्तिरित्यादिश्रुतिभ्यश्च मायाविद्या

७

५२

अनिर्वाच्यमत्‌ तंतत्वज्ञाननिवर्त्यंचाज्ञानमेवतत्स्वपराध्यासेकारणं।न
चात्माश्रयादिदोषप्रसंगोनादित्वेसतानिरासात्‌।अनादित्वेनोत्पत्त्यभावात्‌।
एवं तेर स्वप्रकाशात्मन ज्ञप्तिरूपत्वात्‌।तेनाज्ञानाध्यासविशिष्टचैतन्येऽहंकारा
ध्यासस्तद्विशिष्टेचकामसंकल्पादीनामहंकारधर्माणामिंद्रियधर्माणांचका
णत्वबधिरत्वादीनामध्यासः इंद्रियाणांतुपरोक्षत्वान्नापरोक्षधर्म्यध्यासइति
तः६ सिद्धौंतद्विशिष्टेचस्थूलदेहाध्यासधर्मपुरस्कारेणैवाहंमनुष्यइत्याद्याकारःन
दुःखरूपतअहंदेहइत्येध्यासः तथाप्रतीत्यभावात्‌।तद्विशिष्टेचस्थौल्यादीनां
देहधर्माणामध्यासः तद्विशिष्टेबाह्यानांपुत्रभार्यादीनांसाकल्यवैकल्यादिध
र्माध्यासः एवंचैतन्यस्याप्यहंकारादिषुदेहपर्यंतेष्वध्यासःसंसर्गतः।।अध्यास
तः४ व्यवधानतारतम्याच्चप्रेमतारतम्यं।तदुक्तंवार्तिकामृते।वित्तात्पुत्रःप्रियःपुत्रात्पिंडः
पिंडात्तथेंद्रियं।इंद्रियेभ्यःपरःप्राणःप्राणादात्मापरइतिपिंडःस्थूलशरीरं।प्राणोंतः
करणं।।देहापेक्षयाचेंद्रियाणांप्रियत्वं।शस्त्रवृष्ट्यादिधारापातेचक्षुषोनिमीलन
दर्शनादनुभवसिद्धं।तेनान्योन्याध्यासाच्चिदचिद्ग्रंथिरूपोध्यासःएकतराध्यासांगी

प्रियः २

कारेऽन्यतरस्याभानप्रसंगात्। अध्यस्तस्यैवक्रमेभाननियमात्। इमेरंगरजते
इतिसमूहालंबनक्रमभेदवत्त्वयामितरेतराध्यासः॥ सर्वथा धावधिभूतचैतन्यपरि
शेषेणचनशून्यवादापत्तिः॥ सत्यानृतसंभेदावभासत्वा दध्यासस्य। तस्मात्पूर्व
पूर्वाध्यासमूलएवायमुत्तरोत्तराहंकाराद्यध्यासोबीजांकुरवदनादिरविद्याध्या
सश्चैकएवानादिः॥ नन्वध्यासस्यानादित्वेस्मृतिरूपःपरत्रपूर्वदृष्टावभासइति
वदताभाष्यकारेणस्मृतिरूपत्वेनसंस्कारजन्यत्वमुक्तंविरुध्यते। नकार्याध्यासा
भिप्रायत्वात्तस्य। परत्रपरावभासइत्येतावन्मात्रस्यैवोभयानुगतस्यलक्षणत्वात्।
यद्यासत्यानृतेमिथुनीकृत्येति। भाष्यवचनात्सत्यमिथ्यावस्तुसंभेदावभासो
ध्यासइत्येवसिद्धांतलक्षणंतेनकारणाध्यासेपिनलक्षणाव्याप्तिः कार्याध्यासस्य
प्रवाहरूपेणबीजांकुरवदनादित्वा
भिधानान्नकोपिदोषः एवमध्याससिद्धेएकस्यात्मनोजीवेश्वरादिव्यवस्थाभा
नमेयादिप्रतिकर्मव्यवस्थाचोपपद्यते। तथाहि। अज्ञानोपहितआत्माज्ञा
नतादात्म्यापन्नस्वचिदाभासाविवेकादंतर्यामीसाक्षीजगत्कारणमितिकथ्यते।

प्या२

बुद्ध्युपहितश्च तत्तादात्म्यापन्नस्य चिदाभासाविवेकाज्जीवः कर्ता भोक्ता
प्रमातेति च कथ्यते इति वार्त्तिककारपादाः प्रतिदेहं च बुद्धीनां भिन्नत्वात्त
द्गतचिदाभासभेदेन तदविविक्तचैतन्यमपि भिन्नमिव प्रतीयते। अंशा
नस्य तु सर्वत्राभिन्नत्वात्तद्गचिदाभासभेदाभावात्तदविविक्तसाक्षिचै
तन्यस्य न कदापि भेदभानमिति। अस्मिंश्च पक्षे तत्त्वमादिपदे जहल्लक्ष
णैव साभासस्योपाधेर्वाच्यार्थस्य हानात् आभासस्यापि जडाजडविलक्ष
णत्वेनानिर्वचनीयत्वात्। तदुक्तं संक्षेपशारीरके। साभासाज्ञानवाच्यः
दिर्भवति पुनर्ब्रह्मशब्दस्तथाऽहंशब्दोऽहंकारवाची भवति तु जहती लक्षणा
तत्र पक्षे इति। न चाभासस्यैव वक्तृत्वात्केवलचैतन्यस्य च मुक्तत्वाद्बन्धमो
क्षयोर्वैयधिकरण्यस्य नाचार्यप्रवृत्त्यनुपपत्तिश्चेति वाच्यं केवलचैत
न्यस्यैवाभासद्वारा बद्धत्वाभ्युपगमात्। तदुक्तं। वार्त्तिककारपादैः अयमे का ४
वाहिनोनर्थो यत्संसाध्याभेददर्शनमिति। तेन शुद्धचैतन्यस्याभासएव ब
धः तन्निवृत्तिश्च मोक्ष इति न किंचिदसमंजसं। अथवा आभासाविविक्त
चैतन्यमपि तत्त्वमादिपदवाच्यं। तेन वाच्यैकदेशस्य त्यागात्। अस्मिन्प

सिद्धांतबिंदु

५ तं२

दजहदजहल्लक्षणैवेति न कोपि दोषः। अयमेव च पक्ष आभासवाद इति
गीयते। अज्ञानोपहितं बिंब चैतन्यमीश्वरः। अंतःकरणतत्संस्कारावच्छि
न्नाज्ञानप्रतिबिंबितचैतन्यं जीवः। अज्ञानानुपहितं चैतन्यं शुद्धमिति विवरण
काराः। अज्ञानप्रतिबिंबितचैतन्यमीश्वरः बुद्धिप्रतिबिंबितं चैतन्यं जीवः।
अज्ञानोपहितं तु बिंबचैतन्यं शुद्धमिति संक्षेपशारीरककाराः। अनयोश्च प
क्षयोर्बुद्धिभेदाज्जीवनानात्वं प्रतिबिंबस्य च पारमार्थिकत्वाज्जहदज
ल्लक्षणैव तत्त्वमादिपदेषु। इममेव च प्रतिबिंबवादमाचक्षते। अज्ञानवि
षयीभूतं चैतन्यमीश्वरो ऽज्ञानाश्रयीभूतं च जीव इति वाचस्पतिमिश्राः।
अस्मिन् पक्षे ऽज्ञाननानात्वाज्जीवनानात्वं प्रतिजीवं च प्रपंचभेदो जी
वस्यैव स्वाज्ञानोपहिततया जगदुपादानत्वात्। प्रत्यभिज्ञा चातिसाद
ृश्यात्। ईश्वरस्य च सप्रपंचजीवाविद्याधिष्ठानत्वेन कारणत्वोपचारा
दित्ययमेव चावच्छेदवादः। अज्ञानोपहितं बिंबचैतन्यमीश्वरः अज्ञान
प्रतिबिंबितं चैतन्यं जीव इति वा। अज्ञानानुपहितं शुद्धचैतन्यमीश्वरः अ
ज्ञानोपहितं जीव इति वा मुख्यो वेदांतसिद्धांतः। एकजीववादाख्यः॥ इम

ना२

५

18

मेव च दृष्टिसृष्टिवादमाचक्षते। अस्मिंश्च पक्षे जीव एव स्वाज्ञानवशाज्ज
गदुपादानं निमित्तं च दृश्यं च सर्वं प्रातीतिकं देहभेदाच्च जीवभेदभ्रान्तिः
एकस्यैव स्वकल्पितगुरुशास्त्राद्युपबृंहितश्रवणमननादिदार्ढ्या
दात्मसाक्षात्कारे सति मोक्षः शुकादीनां च मोक्षश्रवणं अर्थवाद एव।
महावाक्ये च तत्पदमनन्तसत्यादिपदवदज्ञानानुपहितचैतन्यलक्ष
णया उपस्थापकमित्याद्यवान्तरभेदाः स्वयमूहनीयाः। ननु वस्तुनि
विकल्पासंभवात् कथं परस्परविरुद्धमतप्रामाण्यं तस्मात्तु किमत्र हेयं
किमुपादेयमिति चेत्। न। लोक एवमाह वस्तुनि विकल्पो न संभवतीति स्थाणु
र्वा पुरुषो वा राक्षसो वृक्षादिविकल्पस्य वस्तुन्यपि दर्शनात्। अतात्वि
की सा कल्पना पुरुषबुद्धिमात्रप्रभवा। इयं तु शास्त्रीया जीवेश्वरविभा
गादिव्यवस्थेति चेन्न। न मतिभेदाभिप्रायाणां द्वितीयात्मतत्त्वे हि प्रधान
फलवत्त्वाददृष्टतत्त्वाच्च प्रमेयं शास्त्रस्य। जीवेश्वरविभागादिकल्पनास्तु
पुरुषबुद्धिमात्रप्रभवा अपि शास्त्रेणानूद्यन्ते तत्त्वज्ञानोपयोगित्वात्॥
फलवत्संनिधावफलं तदङ्गमिति न्यायादप्रमासिद्धस्यापि शास्त्रेणानुवादसं

सर्वप्रमाणानांचाज्ञातज्ञापकत्वेनप्रामाण्यात्॥ ६

१० भवादेतेनद्वैतज्ञानेनाद्वैतज्ञानस्यबाधोनिरस्तः घटादिद्वैतज्ञानस्यापिअ
ज्ञातसन्मात्रांशेऽ द्वैतप्रामाण्याभ्युपगमाच्च। ज्ञानाज्ञानयोः समानाश्र
यविषयत्वनियमात्। जडेचप्रमाणेप्रयोजनाभावेनाज्ञानानंगीकारात्।
तदवछिन्नचैतन्याज्ञानादेवतत्राप्यज्ञानव्यवहारोपपत्तेः प्रामाण्यस्य
चाज्ञातज्ञापकरूपत्वादन्यथास्मृतेरपितदापत्तेरितिवेदांतेषुसर्वत्रैवंविरो

परि६ धेऽप्यमेवंपरिहारः तदाहुर्वार्त्तिकपादाः यथायथाभवत्पुंसांव्युत्पत्तिः प्रत्यगात्मनि।
सासैवप्रक्रियाज्ञेयासाध्वीसाचानवस्थितेतिश्रुतितात्पर्यविषयीभूतार्थवि

कार६ रुद्धत्वंचहेयमेवेतिज्ञानज्ञातं द्रष्टव्यमस्माभिरत्रसमासात्किंचिदेतत्। तदेवंजी
वस्योपाधिनाऽभिभूतत्वात्संसारोपलब्धिः परमेश्वरस्यतूपाधिवशित्वात्स
र्वज्ञत्वादिकमितिसम्यगुपपद्यतेव्यवस्था। ननुभवत्वविद्यावशाज्जीवेश्वर
विभागव्यवस्था। मानमेयादिप्रतिकर्मव्यवस्थातुकथमितिचेत्। उच्यते। दृ
१० श्यत्वाच्छिन्नाश्रितत्वाच्चपरिच्छिन्नाप्यविद्यानिर्वचनीयत्वेनविचारासहावरण
विक्षेपशक्तिद्वयवतीसर्वगतंचिदात्मानमावृणोति। अंगुलिरिवनयनपुरःस्थि
तासूर्यमंडलंतत्रचक्षुषएवावरणमंगुल्यात्मेवरणप्रसंगात्। अधिष्ठानावरण

मंतरेणचविक्षेपानुपपत्तेः ततश्चमायापूर्वपूर्वसंस्कारजीवकर्मप्रयुक्तासती
निखिलजगदाकारेणपरिणमते। साचवस्तुगतचिदाभासद्वाराचैतन्यतादात्म्या
पन्नेति। तत्कार्यमपिसर्वमाभासद्वाराचिदनुस्यूतमेव। तथाचचैतन्यस्य
दीपवत्स्वसंबद्धसर्वभासकत्वात्। जगदुपादानचैतन्यंप्रमाणापेक्षाम
न्तरेणैवसर्वदासर्वभासयत्सर्वज्ञंभवति। तेननतत्रमाणमेयादिव्यवस्था।
किंतुजीवे। तस्यबुद्ध्यवच्छिन्नत्वेनपरिच्छिन्नत्वात्। तेनचिदभिव्यक्ति
योग्यनयेनांतःकरणेनयदायत्संबद्धंभवतितदेवतदातदवच्छिन्नोजी
वोनुभवतीतिनसर्वसांकर्यप्रसंगः। एवमत्रप्रक्रिया। शरीरमध्येस्थितः
सर्वशरीरव्यापकःसत्वप्राधान्येनसूक्ष्मपंचमहाभूतारब्धोऽतःकरणाख्यो
ऽविद्याविवर्तोदर्पणादिवदतिस्वच्छोनेत्रादिद्वारानिर्गत्ययोग्यान्घटा
दिविषयान्व्याप्यतत्तदाकारोभवति। द्रुतताम्रादिवत्। तस्यचसौरालोका
दिवत्झटित्येवसंकोचविकासावुपपद्येते। सचसावयवत्वात्परिणममानो।

देहाभ्यंतरे घटादौ च सम्यक् व्याप्य देहघटयोर्मध्ये ऽपि चक्षुर्द्वारा विच्छिन्नो
ऽप्यवतिष्ठते। तत्र देहावच्छिन्नांतःकरणभागो ऽहंकाराख्यः कर्तेत्युच्यते।
देहविषयमध्यवर्त्ति दंडायमानस्तु भागो वृत्तिज्ञानाख्या क्रियेत्युच्यते।
विषयव्यापकस्तु भागो विषयस्य ज्ञानकर्मत्वसंपादकमभिव्यक्तियोग्य
त्वमित्युच्यते। तस्य च त्रिभागस्यांतःकरणस्यातिस्वच्छत्वात् चैतन्यं तत्रा
भिव्यज्यते। तस्याभिव्यक्तस्य चैतन्यस्यैकत्वेप्यभिव्यंजकांतःकरण
भागभेदात् त्रिधा व्यपदेशो भवति। कर्तृभागावच्छिन्नश्चिद्देशः प्रमाता।
क्रियाभागावच्छिन्नश्चिद्देशः प्रमाणं विषयगतयोग्यत्वभागावच्छिन्न
श्चिद्देशः प्रमितिरिति प्रमेयं तु विषयगतं ब्रह्मचैतन्यमेवाज्ञातं तदेव
ज्ञातं सत्फलं। अत्र च यस्मिन् पक्षे ऽतःकरणावच्छिन्नो जीवो यस्मिंश्च
पक्षे सर्वगतो ऽसंगो ऽविद्याप्रतिबिंबो जीवः तत्रोभयत्रापि प्रमातृचैतन्या
परागार्थ्या विषयचैतन्यावरणभंगार्थं चांतःकरणवृत्तिः यस्मिन् पक्षे।

घावच्छिन्नः सर्वगतो जीव आवृतस्तस्मिन् पक्षे जीवस्यैव जगदुपादान
त्वेन सर्वसंबद्धत्वादावरणभंगार्था वृत्तिरिति विवेकः ननु चिदुपरागा
र्था वृत्तिरिति पक्षे स्वतोऽतःकरणसंबद्धानां धर्माधर्मादीनां ब्रह्मण
श्च वृत्तिमंतरेणैव सर्वदा भानं स्यात् न स्यात्। चैतन्यस्य तत्तदाकार
ताभावात्तदभावे स्वस्वरूपेपि ब्रह्मचैतन्ये आवरणात्। अनावृतत्वेपि
शुक्तिरजतादावस्वच्छत्वात् धर्माधर्मादिविस्वच्छत्वादावृतत्वाभावात्तेन स्व
रूप्यावृत्तेः प्रमाणवृत्त्या तदाकारता। अनावृतेप्यस्वच्छे शुक्तिरजता
दावविद्यावृत्त्या तदाकारता। अनावृतेस्वच्छे तु सुखदुःखादौ स्वत इति
नांतःकरणसंबंधमात्रेण भानप्रसंगः ननु ब्रह्मणः कथमावरणं निर
वद्यस्वप्रकाशस्य तेन सर्वज्ञत्वात्। सत्यं। स्वसंबद्धसर्वावभासकतया
सर्वज्ञमप्यंतःकरणावच्छिन्नजीवाज्ञानविषयतया आवृतमिति व्यपदे
श्यात्। तस्माद्ब्रह्म जगदुपादानमिति पक्षे चिदुपरागार्थावरणभंगार्था च

सि॰बिं॰। १२

वृत्तिर्जीवोपादानत्वपक्षेप्यावरणभंगार्थैव। नन्वेकेनैव घटादिज्ञाने
नावरणभंगे सद्यो मुक्तिप्रसंगः अज्ञानस्यैकत्वात्। नानाज्ञानपक्षेप्ये
कस्य जीवस्यैकाज्ञानोपाधि त्वात्। न। उत्तेजकेन मणेरिव वृत्त्यावर
णस्याभिभवांगीकारात्। तथा च प्रमाणाजन्यातः करणवृत्त्यभावस
हकृतमज्ञानं सति भास्याप्यवस्थानिनास्ति न भातीति प्रतीतिजननसम
र्थमावरणमित्युच्यते। वृत्तौ जातायां तु वृत्तिच्छेदकाभावात्। विद्यमान
मपि विद्यमानसममभवति न स्वकार्यसमर्थमज्ञानं तेनाभिभूतमित्युच्य
ते। नन्वेवं सति ब्रह्मज्ञानेनापि अविद्याया अनिवृत्तेरनिर्मोक्षप्रसंगः।
न तत्त्वमस्यादिवाक्यार्थज्ञानादविद्यानिवृत्त्यभ्युपगमात्। स्वविषय
विषयप्रमात्वेनैवाविद्यानिवर्तकत्वान्महावाक्यार्थज्ञानस्यैवाबाधित
विषयतया प्रमात्वात्। प्रत्यक्षादीनां तु बाधितविषयतयाप्रमत्वेपि
व्यवहारसामर्थ्येन प्रामाण्याभिमानात्। ज्ञानादज्ञाननिवृत्तेरन्यत्राद

पिअ

न५

१२

र्शनं चाकिंचित्करं। स्वानुभवसिद्धत्वात्। अन्यथानुपपत्तेश्च सर्वतोबल
वत्त्वात्। ननु दृष्टमन्यथानुपपत्तिश्चेदखिलवस्तुप्रसाधिका। पिनष्ट्यदृष्टि
बा वैषम्यस्यैव सर्वबलाधिकेति। अथवा मूलाज्ञानस्यैवावस्थाज्ञानानि
घटादिविषयावरणानि। अज्ञानस्य ज्ञानप्रागभावस्थानीयत्वेन यावं
ति ज्ञानानि तावंत्यज्ञानानीत्यभ्युपगमात्। एकेनैव ज्ञानेनैकाज्ञान
स्यैव नाशात्। घटादिज्ञानेनावरणनाशेपि न काचिदनुपपत्तिः नन्वनु नुद्द
२७ मानादिभिरावरणं निवर्त्तते न वा। आद्ये साक्षात्कारिभ्रमस्यापि शंख
पीतत्वादेरिव तत्त्वाद्यनुमानादिना निवृत्तिप्रसंगः अधिष्ठानाज्ञानोपा
दानकत्वेन भ्रमस्य तन्निवृत्तौ निवृत्तेः यौक्तिकज्ञानेन च ब्रह्मण्यनिवृ विद्या४
त्तेः साक्षात्कारार्थं श्रवणमननाद्यपेक्षा न स्यात्। द्वितीये वन्ह्यादिव्यव
हारो न स्यात्। प्रतिबंधस्य विद्यमानत्वात्। उच्यते। द्विविधमावरणं।
एकमसत्त्वापादकमंतःकरणावच्छिन्नसाक्षिनिष्ठमन्यदभानापादकं
विषयावच्छिन्नब्रह्मचैतन्यनिष्ठं। घटमहं न जानामीत्युभयावच्छेदानुभ
उभयप्रदेशेनानुभवात्

वात्। तत्राद्यं परोक्षापरोक्षसाधारणप्रमामात्रेण निवर्त्तते अनुमितेपि वन्ह्या
दौ नास्तीति प्रतीत्यनुदयात्। द्वितीयं तु साक्षात्कारेणैव निवर्त्तते। यदाश्रयं
यदाकारं ज्ञानं तदाश्रयं तदाकारमज्ञानं नाशयतीति नियमात् परोक्षज्ञा
नस्य च विषयेंद्रियसन्निकर्षाभावेनांतःकरणमात्राश्रयत्वात्। अपरो
क्षज्ञानस्यैव विषयेंद्रियसन्निकर्षव्यापारजन्यत्वेन विषयांतःकरणाश्र
यनिष्ठत्वात् तदुक्तं परोक्षज्ञानतो नश्येदसत्वावृतिहेतुता। अपरोक्षाधि
यानश्येदभानावृतिहेतुतेति नानुमानादावसत्वावरणनाशाद्व्यवहा
रोभानावरणानिवृत्त्या च सोपाधिकसाक्षात्कारिप्रमानिवृत्तिरिति तस्मा
न्निर्द्धर्मकस्याप्यात्मनोऽविद्ययांतःकरणतादात्म्याध्यासात्तद्धर्मकर्तृत्व
भोक्तृत्वाद्यध्यासमुपपद्यते न नु सन्मते अनिर्वचनीयख्यात्यनभ्युपगमा
द्येकर्तृत्वादयोऽन्तःकरणधर्मा आत्मन्यध्यस्यंते तेऽनिर्वचनीयास्तत्रोत्पद्यं
त इति वाच्यं तथा च व्यावहारिकप्रातीतिकभेदेन कर्तृत्वभोक्तृत्वादीनां द्वि
धावभासस्यात्। न स्याच्च तादात्म्याभिमानेनाविवेकात् सकलधर्मविशिष्ट

26

स्यैवांतःकरणस्यात्मन्यध्यस्तत्वेनद्व्याप्यभावाद्यातत्प्रमोदकस्याप्यात्मन
उपाधिभेदेनप्रमात्रादिव्यवस्थोपपत्तेर्नसौगतमतापत्तिःनवाविरोधो
ऽन्यापिव्यवस्थाःस्पष्टतरमुपरिष्टादुपपादयिष्यतेतस्मात्ज्ञानरूप
स्याप्यात्मनःसुषुप्तावव्यभिचारित्वाद्देहेंद्रियादीनांव्यभिचारित्वात्
दृश्यत्वाच्चतत्रतत्रात्मबुद्धिःतेषांतेषांवादिनांभ्रांतिरोपनिषदमेवम
तंप्रमाणमितिसिद्धंस्यादेतत् आत्मनोनिर्धर्मकत्वेप्रमात्रादिव्यावहा
रस्याध्यासमूलत्वेचब्राह्मणोयजेतेत्येवमादीनांशास्त्राणामप्रामाण्य
प्रसंगःअकर्तुरभोक्तुश्चात्मनःप्रवृत्त्यनुपपत्तेःवेदाप्रामाण्येचकुतोऽत्र
स्म त्मसिद्धिरपितस्यतन्मात्रग त्वात्शास्त्रयोनित्वादितिन्यायात्तथा
चवेदप्रमाण्यायप्रमात्रादिव्यवहारस्यसत्यत्वमभ्युपेयमित्याशंक्य
मा२ किंतत्त्वज्ञानात्पूर्वमप्रामाण्यमापद्यतेऊर्ध्वंवा।तत्राद्येसर्वेषांप्रमाणानाम
विद्यावद्विषयत्वेनतद्दशायांबाधाभावान्नैःप्रत्युतप्रामाण्यंद्वितीयेऽपि
ष्टापत्तिरेवेत्याह।नवर्णानवर्णाश्रमाचारधर्मानमेधारणाध्यानयो

४ पत्रं ६

गादयोपि। अनात्माश्रयाहंममाध्यासहानादेकोवशिष्टः शिवः केव
लोहं।२। वर्णाः ब्राह्मणक्षत्रियवैश्यशूद्राः आश्रमाः ब्रह्मचारिगृह
स्थवानप्रस्थभिक्षवः आचाराः स्नानशौचादयः धर्माः ब्रह्मचर्यगुरु
सेवादयः अत्र छद्मद्वयगर्भ षष्ठीतत्पुरुषेण वर्णानामाचाराधर्मा
श्चाश्रमाणामप्याचाराधर्माश्च लुप्यंते धारणाबाधविषयत्यागेन म
नसः स्थैर्यं ध्यानं परमात्मचिंतनं योगश्चित्तवृत्तिनिरोधः आदिश
ब्देन श्रवणमननादयो गृह्यंते सर्वे पाद्ज्ञानोत्तरकालमसत्वे हेतुमा
ह अनात्माश्रयाहंममाध्यासहानात्। अनात्मा आत्मविरोधिनी अवि
द्यानदाश्रयस्तदुपादानोयोहंकारममकाराद्यध्यासः तस्य समूल
स्यापि तत्त्वज्ञानेन हानात्तत्प्रयुक्तवर्णाश्रमादिव्यवहारेणनास्तीत्यर्थः
वर्णा श्रमादिव्यवहारस्यामिथ्याज्ञानमात्रमूलत्वेन मिथ्यात्वं दर्श
यितुं तद्व्यतिरेके सुषुप्तौ व्यतिरेकमाह। न माता पिता वा न देवा न लो
का न वेदा न यज्ञा न तीर्थं ब्रुवंति। सुषुप्तौ निरस्तातिशून्यात्मकत्वात्

ना६

शूद्राद्ब्राह्मण्यामुत्पन्नः शूद्रात्क्षत्रियायामुत्पन्नः। असंबद्ध

देकोऽवशिष्टः शिवः केवलोहं। माताजनकस्त्रीपीताजनकः पुमान्देवाइंद्रादयः
आराध्याः लोकास्तदाराधनफलानिस्वर्गादीनि वेदा अलौकिकहिताहितसा
धनताप्रतिपादकानि ब्रह्मप्रतिपादकानि च प्रमाणवाक्यानि यज्ञाः स्वर्गादिसा
धनीभूताज्योतिष्टोमादयः तीर्थयज्ञादिसाधनीभूतः कुरुक्षेत्रादिदेशाः एवं पापक
र्मसाधनान्युपलक्षणीयानि। सर्वेषां देहाभिमानेस्रोतदभावस्त्वतः संबंधाभावादवि
द्यमानत्वसर्थः तथा च सुषुप्तिप्रकरणस्य श्रुतिरत्रपिताऽपिताभवतिमातामाताल्लो
कालोकादेवादेवावेदावेदा अत्र स्तेनोऽस्तेनो भवतिभ्रूणहाभ्रूणहा चांडालो
चांडालः पौल्कसोपौल्कसः श्रमणोऽश्रमणस्तापसोतापसः अनन्वागतंपुण्ये
नानन्वागतंपापेन तीर्णोहितदा सर्वान्शोकान्हृदयस्य भवतीत्याद्याऽभिमा
नाभावे सर्वानर्थनिवृत्तिं दर्शयति ननु सर्वव्यवहाराभावे शून्यतैवस्यान्नस्या
त्तदभावस्यान्यत्वं सर्वानर्थनिवृत्तिं तथाभावस्य
हनिरस्तातिशून्यात्मकत्वादितिनिरस्तमतिशून्यात्मकत्वंयस्मात्तत्तथाभावप्रधा
नानिर्दिष्टाः तस्य सुषुप्तिसाधकत्वात्पुनरुत्थानानुपपत्तेश्च अविनाशीवा अ
रेयमात्मानुच्छित्तिधर्मा। मात्रासंसर्गस्त्वस्य भवति। यत्र द्वैतमिव भवति तदितर इतरं पश्यतीत्यन्वे

मूल५

तद्द्रष्टव्यंनपश्यति।नहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेविनाशित्वान्नतुत
द्वितीयमस्तिततोऽन्यद्विभक्तमित्यादिश्रुतिभ्यश्चात्मचैतन्यस्यसुषुप्तौ
नशून्यतेत्यर्थः।निराकृतमप्येतत्पुनरपिस्थूणानिखननन्यायेननिराक्रि
यतेपक्षानिरस्तमत्रानायाद्यतीतमाद्वितीयमतिशून्यं यच्छलतदात्मकत्वे
ततथा चश्रुतिः यदावैपुरुषःस्वपितिनामसतासोम्यतदासंपन्नोभवे
तितद्यथा।प्रिययास्त्रियासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमेवमेवायंपु
रुषःप्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यंकिंचनवेदनांतरमितितन्नजगत्कार
णीभूतसर्वज्ञसर्वशक्तिपरिपूर्णानंदब्रह्मरूपेणब्रह्मणासहैकत्वादसंसा
चैवजीवइतिसिद्धं एवंतावच्छ्रुतिभिःश्लोकैर्वादिविप्रतिपत्तिनिराकरणपूर्व
कत्वंपदार्थोनिर्द्धारितःसम्प्रतितत्पदार्थस्तथैवनिर्द्धारणीयःतत्रानिराकार्या
विप्रतिपत्त्यादर्श्यते।ननुनब्रह्मणासहजीवस्यैक्यमुपपद्यतेतथाहि
सच्छब्दवाच्यंजगत्कारणंब्रह्मसदेवसोम्येदमग्रआसीदित्यादिवाक्येनप्र
तिपादितंजगत्कारणंचप्रधानमचेतनमितिसांख्याःपशुपतिरेवजगत्का

णांसचचेतनोपिजीवाद्भिन्नस्तदुपास्यएवेतिपाशुपताः भगवान्वासुदेव
ईश्वरोजगत्कारणंतस्मादुत्पद्यतेसंकर्षणाख्योजीवस्तस्मान्मनःप्रद्युम्न
स्ततोहंकारोनिरुद्धस्तेनकार्यजीवस्यतेनसहकनब्रह्मणावासुदेवस्यात्यंताभे
दइतिपांचरात्रिकाः परिणामीनित्यःसर्वज्ञोपिभिन्नोपिभिन्नइतिजैनाः त्रिदंडि
नस्त्वानास्तिसर्वज्ञोवाद्युपेतब्रह्मोन्मायस्याक्रियापुरस्त्वेनतत्रतामस्यामा
वान्किंतुवाग्येन्वादिवहूसर्वज्ञत्वादिदृष्ट्याजगत्कारणंमाणवादिवाजीवोवा पर९
पास्यइतिमिमांसकाः अस्तिनित्यज्ञानादिमान्सर्वज्ञईश्वरःपृथिव्यादिका
र्यलिंगानुमितःसचजीवाद्भिन्नएवेतितार्किकाः क्षणिकःसर्वज्ञइतिसौगताः सर्वज्ञ८
क्लेशकर्मविपाकाशयैरपरामृष्टःपुरुषविशेषोनित्यज्ञानादिरूपःप्रधा
नांशसत्वगुणप्रतिफलिततयासर्वज्ञःसंसारिपुरुषविलक्षणएवेतिपातं
जलाः अद्वितीयपरमानंदएवब्रह्मतत्रजीवस्यवास्तवस्वरूपंमाययाच
सर्वज्ञत्वादिविशिष्टंजगदुपादाननिमित्तंचेत्यौपनिषदाः एवंवादिविप्रतिपत्ति
भिः संदिग्धंतत्पदार्थमौपनिषदपक्षपरिशोधनेननिर्णयायाहभगवान्

सि० विंदु॥

१८

नसांख्यंनशैवंनतत्पांचरात्रंनजैनंनमीमांसकादेर्मतंवा॥ विशिष्टानुभूत्याविशु
द्धात्मकत्वात्तदेकोऽवशिष्टःशिवःकेवलोहं॥४॥ आदिशब्देनानुक्तानांसंग्रहः नवा
वद्ध्वैतनंजगदुपादानंतदैक्षतबहुस्यांप्रजायेयेतीक्षणपूर्वकस्रष्टृत्वश्रवणात्।
अनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिचजीवात्मकत्वव्यपदेशात्
येनाश्रुतंश्रुतंभवतिअमतंमतमविज्ञातंविज्ञातमितिचैकविज्ञानेनसर्वविज्ञानप्र
तिपादनात्प्रधानज्ञानेनचतदप्रसक्तिःकालापुरुषाणाज्ञातुमशक्यत्वात्। एत
दात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइतिचतदभेदस्यनव सत्वश्र
देशात्। तस्माद्वाएतस्मादात्मनआकाशःसंभूतइतिश्रुत्यंतरादचेतनस्यजगत्कार
णत्वेविचित्ररचनानुपपत्तेःप्रधानमहदादेरप्रामाणिकत्वाच्चनसांख्यमतंसाधु।
एवंपाशुपतंपांचरात्रिकंजैनंचमतंश्रुतियुक्तिबाधितत्वादयुक्तंनचविधिशे
षत्वात् श्रुतेर्नब्रह्मप्रतिपादकतेति मीमांसकमतंयुक्तं। असिद्धत्वाद्विधिशेषत्व
स्यनचार्थवादाधिकरणन्यायाद्विधिशेषत्ववैषम्यात्स्वतःप्रयोजनवदर्थप्र
तिपादकानांवायुर्वैक्षेपिष्ठादेवतेत्येवमादीनांस्वाध्यायविधिग्रहणान्यथानु

१८
द्व

पपत्याप्रयोजनवदर्थपरत्वेकल्पनीयेत्राबद्भावनेतिकर्त्तव्यतांशसाकांक्षाविधेः
संप्रदानभूतदेवतादिस्कातिद्वारेणतदंशापूरकत्वान्नष्टाश्वदग्धरथन्यायेनत
दुभयैकवाक्यतयार्थवादाधिकरणेनिर्णीतंवेदांतवाक्यजन्यज्ञानाच्चसाक्षाद
वपरमानंदप्राप्तिर्निःशेषदुःखनिवृत्तिश्चपुरुषार्थोलभ्यतइतिनिराकांक्षत्वा
न्नान्यशेषत्वसंभावनाप्रसूतविधयएवातःकरणशुद्धिद्वारातच्छेषतापिजन्नुइति
तस्मात्प्रयोजनवदबाधितज्ञातज्ञापकत्वेनवेदांतानांस्वतएवप्रामाण्यादस्त्येव
ब्रह्मेतिनमीमांसकमतसिद्धिः।तार्किकादीनांचमतंतत्वमस्यहंब्रह्मास्मि अय
मात्माब्रह्मसत्यं ज्ञानमनंतंब्रह्मेत्यादिश्रुतिबाधितंएकमेवाद्वितीयंनेहनाना
स्तिकिंचनेत्यादिश्रुतिबाधितंचाभिन्नाभिन्नत्वसंख्याणिकत्वंचाकाशवत्सर्वग
तश्चनित्यइत्यादिश्रुतिबाधितंअत्रचसर्वेषांमतस्यासत्वेप्रतिज्ञातविशुद्धा
त्मकत्वादितिहेतुःनिर्विकल्पकाद्वितीयचैतन्यरूपत्वादित्यर्थःअत्रहेतुःविशि
ष्टानुभूत्यातिविशिष्टसाविकल्पकानुभूतिभ्योव्यावृत्तायातत्वमस्यादिवाक्य
जन्याखंडानुभूतिस्तत्यस्यर्थःतेनसर्वव्यापकमद्वितीयंपरमानंदबोधरूपंचब्र
ह्मेतिसिद्धंननुसएषोणिमाऽणोरणीयानितिब्रह्मणोणुत्वश्रुतेःअंगुष्ठमात्रः

ती२

सि० टी० ॥

९७

५२

पुरुषो । आराग्रमात्रो ह्यवरोपि दृष्ट इत्यादिश्रुतिप्रतिपादितोऽणुर्जीवाद्भिन्न
त्वाच्च न ब्रह्मणः सर्वव्यापकत्वमित्याशंक्य ब्रह्मैवेदममृतं पुरस्तात् ब्रह्म पश्चाद्ब्रह्म
दक्षिणतश्चोत्तरेणाधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठं तदेतद्ब्रह्मा
पूर्वमनपरमनन्तरमबाह्यमित्याद्याः श्रुतयो निर्विशेषमेव ब्रह्म प्रतिपादयन्तीति
पूर्वोक्तमेव दृढयन्नाह । न चाणुर्न चास्थूलो न चान्तर्न बाह्ये न मध्ये न तीर्यङ् न पूर्वा
परादि । वियद्व्यापकत्वादूरयेऽ एकरूपस्तदेकोऽवशिष्टः शिवः केवलोहं ॥५॥
वियद्व्यापकत्वा[illegible] हि यद्वद्व्यापकत्वादाकाशवत्सर्वगतश्च नित्य इति
श्रुतेः वियतो व्यापकत्वादिति वा ज्यायानाकाशान्महतो महीयानिति श्रुतेः जी
वस्य सकलदेहव्यापि चैतन्योपलब्ध्या महत्त्वेषु पाधिधर्माध्यासेनाराग्रमात्र
त्वाभिधानात् । बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यवरोपि दृष्ट इति श्रुतेः
ब्रह्मणश्च सूक्ष्मत्वाभिप्रायेणाणुत्वव्यपदेशात् । शेषमतिरोहितार्थं । स्यादेत
त् । ब्रह्मणो जगदुपादानत्वादुपादानोपादेययोश्चाभेदाद्धि चित्रं जगदभिन्न
त्वं ब्रह्मणो दुःखरूपत्वात्तदभिन्नत्वेन जीवस्य परमपुरुषार्थप्राप्तिरित्या
शंक्य ब्रह्मणः स्वप्रकाशपरमानंदरूपत्वान्निखिलजगद्भ्रमाधिष्ठानत्वेन च

९७

अरूपं ५

नपीतं २

मे

कारणत्वव्यपदेशात्। अध्यस्तेन समं संबंधाभावात् न तत्रानर्थलिप्तोप्यसौ स्याद्।
न स्थूलं न सूक्ष्मं न रक्तं न कुब्जो न पीनं [illegible] न ह्रस्वं न दीर्घं। अरूपं तथा ज्योतिरा
कारकत्वात् तदेकोऽवशिष्टः शिवः केवलोऽहं ॥५॥ कुब्जो। अणु। पीनो। महत्। तेना
णुमहत्ह्रस्वदीर्घमिति चतुर्विधपरिमाणनिषेधाद्द्रव्यत्वप्रतिषेधः। रूप्यत
इति रूपं प्रमेयं न प्रमेयं न सर्वेषामेव द्रव्यगुणकर्मादिपदार्थानां तच्छायमुपगतं।
नो निषेधः। तथा च श्रुतिः। अस्थूलमनण्वह्रस्वमदीर्घमलोहितमित्याद्या। अशब्द
मस्पर्शमरूपमव्ययं तथारसं नित्यमगंधवच्च यदित्याद्या च सर्वनिषेधश्रुत्युपर
मात्मस्वरूपं प्रतिपादयति। श्रौतस्याप्यर्थस्य न्यायेन निर्णयाय हेतुमाह ज्योति
राकारकत्वादिति स्वप्रकाशज्ञानरूपत्वेनाप्रमेयत्वात्। प्रमेयत्वे घटादिवज्जडत्वा
पत्तेस्तदप्रमेयं ध्रुवमिति श्रुतेरयमर्थः। ननु कस्य ब्रह्मभाव उपदिश्यते ब्रह्मणोऽ
ब्रह्मणो वा। नान्त्यः तस्य जडत्वादसत्त्वाच्च। न प्रथमः उपदेशानर्थक्यात्। ब्रह्मणा
त्वस्य स्वत एव सिद्धत्वात्। जीवस्य स्वतो ब्रह्मत्वाभावेपि अविद्याव्यवधानं ज्ञानेन नि
वर्त्तत इति चेन्न। अविद्यानिवृत्तेरात्माभिन्नत्वे द्वैतापत्तेर्ब्रह्मणोऽसिद्धिप्रसंगात्।
तदुक्तं वार्त्तिके। अव्यावृत्तानुगतवस्तु ब्रह्मेति भण्यते ब्रह्मार्थ्यादिदुर्लभत्वस्यात्

द्वितीये सति वस्तुनीति अभिन्नत्वे चोपदेशानर्थक्यमिस्यक्तं । अत्र किंपरम
र्थतः फलाभाव मापिप्राषि । किं वा प्रतीतितोपि । तत्राद्यमिष्टापत्त्यापरिहरति । न
शास्ता न शास्त्रं न शिष्यो न शिक्षा न च त्वं नाहं न चायं प्रपंचः । स्वरूपावबोधो
विकल्पासहिष्णुस्तदेकोऽवशिष्टः शिवः केवलोहं ॥ ७ ॥ शास्ता । उपदेशककर्ता ।
शास्त्रं । उपदेशकरणं । शिष्य उपदेशकर्म । शिक्षा उपदेशक्रिया । त्वं श्रोता अहं व
क्ता । अयं सर्वप्रमाणसंनिधापितः प्रपंचः देहेंद्रियादिरनर्थः परमार्थतो नास्ति
त्यर्थः द्वितीयं निराकरोति स्वरूपेति अयमर्थः यद्यपि विद्या निवृत्तिरात्माऽनात्मा
चैत्यादिविकल्पनात्किमपि फलं निरूपयितुं न शक्यते । तथापि स्वरूपावबोधो वि
कल्पनीयो । सर्वद्वैतापमर्द न विकल्प
ज्ञानफलमनुभूयते । न चैतत्कथमिति विकल्पनीयं । सर्वद्वैतापमर्देन विकल्पा
सहिष्णुत्वान्नहि दृष्टेनुपपन्नं नाम तथा च श्रुतिः नानिरोधो न चोत्पत्तिर्न बद्धो
न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता । ब्रह्म वा इदमग्र आसीत्तदा
त्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवदित्याद्यापूर्वमपि ब्रह्मरूपस्यैव
सतो जीवस्याज्ञानादब्रह्मभावं दर्शयित्वा सर्वं चैद्वैतजातं वारयति । नन्वात्मनः स्वप्र
काशचैतन्यरूपत्वे सर्वदा समाने जाग्रत्स्वप्नसुषुप्त्यादिव्यवस्थाकथनं च

घ२

स्यैवव्यवस्थेतिवाच्यंतयासतिसर्वस्यैवस्वप्नत्वापत्तेरितिचेत्।न।लक्षणतःत्र
याणांस्वप्नेऽपिप्रतिभासतआविद्यकविशेषसम्भवात्सद्विलक्षणत्वेनचस्या
शेषत्वा[illegible]वस्थोपपत्तेःपरमार्थतस्तुनकापिव्यवस्थेत्याह।नजाग्रन्नमेस्वप्न
कोवासुषुप्तिर्नविश्वोनवातैजसःप्राज्ञकोवा॥आविद्यात्मकत्वात्त्रयाणांतुरी
यस्तदेकोऽवशिष्टःशिवःकेवलोऽहं॥८॥अत्रलयक्रमेणपौर्वापर्यनिर्द्दे
स्तथास्यस्मन्मतपदार्थोद्विविधःदृग्दृश्यश्च।अन्यवादिपरिकल्पितानामपि
पदार्थानामत्रैवान्तर्भावात्।तत्रदृक्पदार्थआत्मापारमार्थिकःसर्वदैकरू
पोऽप्यौपाधिकभेदेनत्रिविधःईश्वरोजीवःसाक्षीचेति।तत्रकारणीभूताज्ञानो
पाधिरीश्वरःअन्तःकरणतत्संस्कारावच्छिन्नाज्ञानोपहितोजीवइतिप्रपञ्चि
तंचैतदधस्तात्।अविद्याप्रतिबिम्बेश्वरपक्षेबिम्बचैतन्यंसाक्षीबिम्बेश्वरपक्षे
चबिम्बप्रतिबिम्बमुखानुगतमुखस्वरूपवज्जीवेश्वरानुगतसंविदनुसंधात
चैतन्यंसाक्षीत्युच्यते।वार्त्तिककारमतेतुईश्वरएवसाक्षीतिद्वैविध्यमेवजीवे
श्वरभेदेनदृशः।तत्रेश्वरोऽपित्रिविधःस्वोपाधिभूताविद्यागुणत्रयभेदेनविष्णु
ब्रह्मरुद्रभेदात्।कारणीभूतसत्त्वगुणावच्छिन्नोविष्णुःपालयिता।कारणी

भूतरजोपहितोत्रब्रह्मास्रष्टा। हिरण्यगर्भस्तुमहाभूतकारणत्वाभावान्नब्रह्मा।
तथापिस्थूलभूतस्रष्टृत्वात्क्वचिद्ब्रह्मेत्युपचर्यते। कारणीभूततमउपहितोरु
द्रःसंहर्त्ता। एवंचैकस्यैवचतुर्भुजचतुर्मुखपंचमुखाद्याःपुमाकाराःश्रीभारतीभ
वान्याद्याश्चस्त्र्याकाराः। अन्येचमत्स्यकूर्माद्याऽनंतावताराःलीलयैवाविर्भवंतिभ
क्तानुग्रहार्थमितिसर्वंध्येयं। चिन्मयस्याद्वितीयस्यनिष्कलस्याशरीरिणः। उपासकानां
कार्यार्थंब्रह्मणोरूपकल्पना॥ जीवोपित्रिविधःस्वोपाध्यवांतरभेदेन। विश्वतैज
सप्राज्ञभेदात्। तत्राविद्यांतःकरणस्थूलशरीरावच्छिन्नोजाग्रदवस्थाभिमानीवि
श्वः। सएवस्थूलशरीराभिमानरहितःउपाधिद्वयोपहितःस्वप्नाभिमानीतैजसःश
रीरांतःकरणोपाधिद्वयरहितोंतःकरणसंस्कारावच्छिन्नोविद्यामात्रोपहितःसुषु
प्त्यवस्थाभिमानीप्राज्ञः। एतेषांचस्वतंत्रोपाधिभेदाभावेनस्वतंत्रभेदाभावेपिअ
वांतरोपाधिभेदादेकस्यैवावांतरभेदोव्यवह्रियते। साक्षीतुसर्वानुसंधातासर्वानु
गतस्तुरीयाख्यएकविधएवतत्रोपाधिभेदेनापिनकश्चिद्भेदस्तदुपाधेरेकरूप
त्वात्। अविद्यातद्व्याप्यतत्कार्यात्मकःप्रपंचोदृश्यपदार्थः। तस्यचापारमार्थिकत्वे
पिव्यावहारिकसत्त्वाभ्युपगमात्। नस्वाप्निकपदार्थवन्निरूपणंव्यर्थमुपासना
दावुपयोगादिति। सोपित्रिविधोऽध्यस्तामूर्त्तमूर्त्तभेदात्। तत्रसाभासोविद्याम्

चिदाभासरूपेणेश्वरेणाधिष्ठिता २

च र्तुप्रपंचबीजशक्तिरूपात् तदजन्यत्वेपि तन्निवृत्तौ निवर्तमानत्वेन तद्व्याप्यत्वे

तत्र अविद्या तं तत्संबंधजीवेश्वरविभागचिदाभासैः सहानादित्वादव्याकृतमित्युच्यते। प्रेरिता २

सा स्वयं जडापि अजडेन चिदाभासेनोज्ज्वलिता पूर्वपूर्वसंस्कारजीवकर्मप्रयुक्ता

स शब्दस्पर्शरूपरसगंधात्मिकान्याकाशवायुतेजोजलपृथिव्याख्यानि पंचम

हा तानि जनयति तत्र पूर्वपूर्वभूतभावापन्नाया अविद्याया उत्तरोत्तरभूतकारणत्वा

त्पू पूर्वभूतगुणानामुत्तरोत्तरभूतेष्वनुप्रवेशः एवमविद्या तत्त्वबोधकारी पिधानकरूप

प्र वरणात्मा चाक्षुषज्ञानविरोधी आलोकनाउपश्लिष्टतिमहाविद्युदादिवदाविर्भ

वा तिरोभवतीति च शिष्टात् संसारहेतुदेहोपादानत्वाभावाच्च नग्नेतिश्रुतः छिप्र

कि यायामाश्रापते इत्सोविरोधः दिक्कालौ चाप्रामाणिकत्वान्नोक्तौ। आकाशस्य वा दिग्व

व रजनकत्वसंभवात् दिशः श्रोत्रमिति च श्रुतेः कालस्त्वविच्छेदकस्तस्यापि सर्वाधार

ह दिति अयं चाव्याकृतपदार्थ ईश्वरोपाधिः तानि च सूक्ष्माण्यपञ्चीकृतानि पंच

म भूतान्यमुत्तरिव्यानिकारणे क्यासात्वरजस्तमोगुणात्मकानि सत्त्वांशप्राधान्ये

म तानाक्रियाशक्त्युपासकमेकं स्वच्छद्रव्यं चित्ररूपमिव मिलित्वा जनयति तस्य च ज्ञा

ग शक्तिप्रधानांशात् अंतःकरणं तच्च बुद्धिर्मन इति चोच्यते। क्रियाशक्तिप्रधानांशाः प्रा

णः स पंचधा। प्राणोऽपानो व्यान उदान समान इति। एवमेकैकभूतेभ्यो ज्ञानक्रिया

अन्नमयं हि सौम्य मनः

सि० बि०॥ २०

शक्तिभेदात्प्रत्येकमिंद्रियद्वयं द्वयं जायते। आकाशाच्छ्रोत्रवाचौ। वायोस्त्वक्पा
णी तेजसः चक्षुः पादौ। अपां रसनपायू। पृथिव्या घ्राणोपस्थौ चेति अन्नं ते
जोमयी वागिति श्रुतेः तेजसी वाक्। पादस्य नाभसत्वे इति केचित् तच्छब्दव्यंजके
न्द्रियत्वेन श्रोत्रवद्वाचो नाभसत्वं। पादाचिकित्सया च चक्षुषः स्वास्थ्यदर्शना
च्चक्षुर्वत्पादस्यापि तैजसत्वमिति युक्तमुत्पश्यामः तेजोमयत्वश्रुतिस्तु मनसः
पंचभूतकार्यस्याप्यन्नमयत्वश्रुतिरिव तदुपकार्यतया व्याख्येया मनसश्च पं
चभूतगुणग्राहकत्वेन तद्धत्वनियमात्पंचभूतात्मकत्वमित्यन्यदेतत्। एतेषा
मधिष्ठातारो देवाः अपि ज्ञानक्रियाशक्तिप्रधानाः दिग्वातार्कप्रचेतो अश्विसवि
ष्णुवरुणमित्रौ अग्निप्रजापती इति तत्र ज्ञानशक्तिसमष्टितः करणं क्रियाशक्ति
समष्टिः प्राणः शब्दस्पर्शरूपरसगंधग्राहकाणि श्रोत्रत्वक्चक्षूरसनघ्राणाख्या
नि पंच ज्ञानेंद्रियाणि। त्वक्चक्षुषी स्वग्राहकगुणाश्रयं द्रव्यमपि गृ[illegible]तः श्रोत्रम
पि चक्षुर्वत्स्वाग्राहकदूरस्थशब्द इति प्रसंगात्। वचनादानगतिविसर्गानंदजनका
नि वाक्पाणिपादपायूपस्थाख्यानि पंच कर्मेंद्रियाणि। एतत्सर्वसमष्टिलिंगासमुद
याकलिंगं ज्ञानशक्तिप्राधान्येन हिरण्यगर्भ इति। क्रियाशक्तिप्राधान्येन सूत्र
मिति चोच्यते। अयममूर्त्तपदार्थः कार्यत्वादुच्छस्थो समष्टौ च जीवोपाधिरेव॥

३७

सि० ५
२०

प्रेरितवान्

तानिचतथाभूतानिभूतानिभोगायतनंशरीरंभोग्यंचविषयमंतरेणभोगंजनयितु
मशक्नुवंतिजीवकर्मप्रयुक्तेश्वरेच्छोत्पाद्यपंचीकृतानिभवंति।तत्रप्रत्येकंपंच
भूतानिद्विधाविभज्यंतेतत्रैकैकोभागश्चतुर्धाविभज्यते।तद्भागचतुष्टयंचस्व
भागंविहायेतरभूतचतुष्टयार्धभागेप्रविशतीतिस्वस्यार्धभागेनेतरेषामष्टमभा
गैश्चपंचीकरणान्मेलनेनाधिक्यादाकाशादिशब्दप्रयोगः।अत्रत्रिवृतंत्रिवृ
तमेकैकंकरवाणीतिश्रुतेःत्रिवृत्कुर्वतउपदेशादितिसूत्रात्त्रयाणामेवमेलनप्र
तीतेश्चत्रिवृत्करणमेवकेचिन्मन्यंतेतदपितदधिकरणन्यायेनैवनिरस्ताः।तथा
हि।तैत्तिरीयके।तस्माद्वाएतस्मादात्मनआकाशःसंभूतःआकाशाद्वायुःवायो
रग्निरित्यादिश्रुतेःछांदोग्येत्रयाणांतेजोबन्नानांसृष्टिश्रवणेपिद्वयोरुपसंहा
रःतेजःप्राथम्यपदार्थधर्मापेक्षयाआकाशवायुपदार्थयोर्बलीयस्त्वात्।छांदो
ग्येचैकविज्ञानेनसर्वविज्ञानप्रतिज्ञानादाकाशवाय्वोरप्येतन्नयाद्ब्रह्मकार्यत्व
स्यावश्यंवाच्यत्वात्।तत्रपंचानामेवमेलनेप्यवयुसंवादेनत्रिवृत्करणोपपत्ति
स्त्रिवृत्तमेकैकमितितुकल्पनायांवाक्यभेदप्रसंगःत्रिवृत्कुर्वतउपदेशादितिसूत्रंह

नुवादत्वान्नपंचीकरणंन्यायसिद्धं बाधितुमुत्सहते। मेलनप्रतीतिस्तु शरीरेंद्रि
यानामविशिष्टत्वपंचीकृतपंचमहाभूतानीतिभाष्यकारवचनं। तस्मादल
मनेनानात्मचिंतनेनेतिदिक्। तानिपंचीकृतपंचमहाभूतानि मूर्त्ताख्यानि मि
लित्वैकंकार्यमिंद्रियाणां अधिष्ठानंभोगायतनमुत्पादयंतितद्देवशरीरमित्यु
च्यते। तत्रसत्वप्रधानंदेवशरीरं। रजःप्रधानंमनुष्यशरीरं। तमःप्रधानंतिर्यगा
दिस्थावरांतंशरीरं। तस्यचशरीरस्यपांचभौतिकत्वेपिचित्ररूपस्येवकचिन्न्यू
नाधिकभावोभूतानांनविरुध्यते। एवंविषया अपिपंचीकृतैकैकभूतजन्या
श्चतुर्दशभुवनाख्याऊर्ध्वमध्याधोभावेनसत्वरजस्तमोगुणप्रधानाः घटादय
श्चएतत्सर्वंब्रह्मांडाख्यंविराडितिमूर्त्तमितिचोच्यते। अयमौपनिषदःसृष्टिक्र
मः। एतद्विपरीतोलयक्रमः। मूर्त्तंपंचीकृतपंचमहाभूततत्कार्यात्मकंविराडा
ख्यंपृथिव्यादेकैकभूतलयेनामूर्त्तंऽपंचीकृतपंचमहाभूतात्मकंहिरण्यगर्भा
ख्यंस्वकारणेलीयते। सएषचैवैनंदिनःप्रलयः। अमूर्त्तंचाव्याकृतपरमेश्वरोपा
धौ अव्याकृतस्यत्वनादित्वेनकारणाभावान्नलयः। स्वकारणेसूक्ष्मरूपेणावस्था
नंलयइतितल्लक्षणात्। अयमेवचप्राकृतप्रलयः। ब्रह्मज्ञानादुच्छेदस्त्वात्यंतिकः

प्रलयः सचकारणक्रमेणैवकारणोपादेयवकार्येष्विदास्सर्वंचसृष्टिप्रलया
दिकंस्वप्नसृष्टिप्रलयवदपारमार्थिकमपिवासनादार्ढ्यात् व्यवहारसमर्थमि
तिनमायिकत्वेपितुच्छत्वप्रसंगः यथाचैतत्तथाव्यक्तमाकरे। एवंस्थितेजागरणा
दिव्यवस्थोच्यते। इंद्रियवृत्तिकालीनार्थोपलम्भोजागरणं॥ तत्रचमूर्त्ताविराड्
व्यष्टिभागंप्रत्यक्षादिप्रमाणषट्केनव्यवह्रियमाणत्वाद्व्यावहारिकविश्वाख्येन
जीवेनापृथक्कृत्यतेसचदेहेंद्रियादिषुप्रवेशाद्व्यापनाद्वाविश्वइत्युच्यते। वि
श्वाप्रवज्ञानाविशिष्टव्याप्तावितिचस्मरणात्। अत्रयद्यपिविश्वेनामूर्त्ताख्यमक्षा
सृतंचानुमानादिनानुभूयते। तथापिव्यावहारिकंसर्वोविश्वेनैवज्ञायतइति
नियमात्स्थूलशरीराद्यभिमानित्वाच्चनतस्यावस्थांतरव्यापकत्वंशुक्तिर
जतादिज्ञानानामप्रामाणिकत्वात्तद्विषयस्याव्यावहारिकत्वेपींद्रियव्यापार
कालीनत्वाज्जागरणत्वोपपत्तेः ज्ञानासातिप्राक्रियाचाधस्ताद्युक्तैव। एवंजा
ग्रद्भोगजनककर्मक्षयेस्वापभोगजनककर्मोदयेचतामस्यांनिद्राख्यायावृत्त्या
स्थूलदेहाभिमानेदूरीकृतेसर्वेष्विंद्रियेषुदेवतानुग्रहाभावान्निर्व्यापारतयालीने
ष्वविश्वापिलीनइत्युच्यते। तदास्वप्नावस्थातत्रांतःकरणगतवासनानिमित्तं

पा २

43

द्रियव्यापाराभावकालीनोर्थोपलंभःस्वप्नःतत्रमनएवगजतुरगाद्यर्थाकारेणपरि
णमते॥अविद्यावृत्त्याचज्ञायतइतिकेचित्‌अविद्यैवशुक्तिरजतादिवत्तत्त
दर्थाकारेणपरिणमतेज्ञायतेच अविद्यावृत्त्येत्यन्ये।कःपक्षःश्रेयानुत्तरःअ
विद्याएवसर्वत्रार्थाध्यासज्ञानाध्यासोपादानत्वेनकल्पितत्वान्मनोगतवासना
निमित्तत्वेनचक्वचिन्मनःपरिणामत्वव्यपदेशात्‌नतुतदामनसोहस्त्याद्याकार
परिणामानभ्युपगमेद्रष्टृत्वसंभवेनात्मनःस्वयंज्योतिष्ट्वासिद्धिरितिचेतन्न।
बहिरिंद्रियव्यापाराभावेनतदानीमनसोऽग्राहकत्वात्‌नसहकारणैवतस्यग्राहक
त्वान्नियमात्स वृत्तिकांतःकरणावच्छिन्नस्यचचैतन्यस्यप्रमातृत्वनियमात्‌।
तदांतःकरणसत्वेपिप्रमातृत्वाभावःकिमधिष्ठानंस्वप्नाध्यासस्य।मनोवच्छिन्नं
जीवचैतन्यमित्येके।मूलाज्ञानावच्छिन्नंब्रह्मचैतन्यमित्यपरे।किंश्रेयः।मत
भेदेनोभयमपि।तथाहि।जाग्रद्बोधेनस्वप्नभ्रमनिवृत्त्यभ्युपगमादधिष्ठानज्ञा
नादेवभ्रमनिवृत्तेर्ब्रह्मचैतन्यस्यचाधिष्ठानत्वेसंसारदशायांतत्ज्ञानाभा
वात्‌ज्ञानेवासर्वद्वैतनिवृत्तेर्नजाग्रद्बोधात्स्वप्ननिवृत्तिःस्यात्‌।सहिकश्चैति
जीवकर्तृत्वश्रुतेराकाशादिप्रपंचवत्सर्वसाधारण्यापत्तेश्चनमूलाज्ञान।

अंगीक्षिपेत ७

वच्छिन्नं ब्रह्मचैतन्यमधिष्ठानं। ननु जीवचैतन्यस्यानावृतत्वेन सर्वदा भासमा
नत्वात् कथमधिष्ठानत्वं। सत्यं। तत्रापि स्वप्नाध्यासानुकूलव्यावहारिकसंघात
भानविरोध्यवस्थाज्ञानाभ्युपगमात्। स्वप्नदशायां चाहं मनुष्य इति प्रातीतिक
संघातांतरभानाभ्युपगमात्। शय्यायां स्वपिमीति शय्यांतरभानवत् भानसाम
ग्र्यभावश्च तुल्य एव। नन्वहं मनुष्य इत्यादिव्यावहारिकसंघातज्ञानस्य प्रमाणा
जन्यत्वात् कथमज्ञाननिवर्तकता। अवस्थांतरान्यथानुपपत्त्या तत्कल्पने सुषुप्ता
वपि स्वप्नबाधकज्ञानमास्थीयेत। तच्चानिष्टं। जाग्रदापत्तेरिति चेन्न। साध्वेवोक्तः
स्वप्नावस्थाज्ञानस्यैवातः करणलयसहितस्य सुषुप्तिरूपत्वान्न तत्र तद्बाधः जा
गरणे तु मिथ्यैव स्वप्नो भादित्यनुभवात्। अहमिति ज्ञानस्य प्रमाणाजन्यत्वेपि य

दि५

थार्थत्वात् शरीरो ज्ञानस्य च प्रमाणजन्यत्वादवस्थाज्ञान [illegible] विरोधित्वमनुभवसि
द्धं। विशेषाज्ञानं तु न प्रमाणजन्यवृत्तिमंतरेण निवर्तते। साक्षिणश्चाविद्यानिव
र्तकत्वाभावो अविद्यासाधकत्वेनैव धर्मिग्राहक [illegible] मानसिद्ध इति न किंचिदवद्यं। या
वंति ज्ञानानि तावंत्यज्ञानानीति चाभ्युपगमात् शुक्तिज्ञानेनैव व्यावहारिकसंघात
ज्ञानेनाज्ञाननिवृत्तावपि पुनरपि कदाचिदुद्भूतं तत्र भवत् स्वप्नाध्यासानुपपत्तेरि
ति जीवचैतन्यमेवाधिष्ठानमिति पक्षे न कोपि दोषः यदा तु ब्रह्मज्ञानादेवाज्ञाननि

वस्याभ्युपगमः तदा रज्ज्वां इदं ज्ञानेन सर्पभ्रमतिरोधानवदधिष्ठानज्ञानाभावेऽपि
जाग्रद्भ्रमेण स्वप्नभ्रमतिरोभावोपपत्तेः ब्रह्मचैतन्यमेव स्वप्नाध्यासोपादानमि
तिपक्षेऽपि न काऽपि दोषः प्रतिजीवं स्वप्नासाधारण्यं तु मनोगतवासनानामसा
धारण्यादेव मनोऽवच्छिन्नब्रह्मचैतन्यमेव वाऽधिष्ठानम् एतस्मिन्नपि पक्षेऽवस्थाज्ञा
नस्यावरकत्वांगीकारान्नकाप्यनुपपत्तिः अतएव शास्त्रेषु क्वचित्तथा तथा व्यपदे
शाः ननु मनोऽवच्छिन्नस्य चैतन्यस्याधिष्ठानत्वे अहं गज इत्याद्यहंकारसामानाधि
करण्येनैव प्रतीतिः स्यात् इदं रजतमिति शुक्तिसामानाधिकरण्येन रजतप्रतीति
वन्न त्वयं गज इति॥ ब्रह्मचैतन्यस्याप्यधिष्ठानत्वपक्षेऽपि गज इत्याकारैव प्रतीतिः
स्यान्न त्वयं गज इति तत्रापीदंकारास्पदीभूतबाह्यार्थाभावस्य समानत्वादिति चेत्।
न आद्यपक्षे अहंकारस्य शुक्तिवदधिष्ठानावच्छेदकत्वाच्छुक्तिरजतमितिवदहं गज इ
ति न भ्रमाकारप्रसंगः अहमिति ज्ञानस्य शुक्तिरिति ज्ञानस्य च भ्रमाविरोधित्वा
दिदमंशस्य च भ्रमाविरोधिन एव तत्र भानाभ्युपगमात् स्वप्ने तु गज इत्याकारवद
यमित्याकारोऽपि कल्पित एवोभयाकारबाधेऽप्यधिष्ठानभूतचैतन्यस्याबाधात् न
शून्यवादप्रसंगः जाग्रद्दशायामपि शुक्तौ नेदंकारविलक्षणस्य प्रतीतिकस्यैव रज
तेदंकारस्य मानाभ्युपगमाच्च। अध्यस्तमेव हि परिस्फुरति भ्रमेष्विति न्यायात्। शुक्तौ

दमंत्रात्मानपक्षेपि नेदमंत्रास्य सत्यत्वमध्यासे प्रयोजकं किंत्वधिष्ठानसत्यत्वम धिष्ठा
नं च तत्राज्ञातशुक्तिचैतन्यमेवात्रापि साक्षिचैतन्यविद्युत एवं सुप पाद्दते। त
स्मान्नपक्षद्वयेपि काप्यनुपपत्तिः अत्र च सुखाद्यनुपदार्थभोक्ता तेजस इत्युच्य
ते। पित्ताख्यतेजः प्राधान्यत्वादादित्यादिज्योतिरंतरणापि भासकत्वादिति वा। एवं
जाग्रत्स्वप्नभोगद्वयेन श्रांतस्य जीवस्य तदुभयकारणकर्मक्षये ऽज्ञाने त्वात्मस्येव
च्छिन्नस्य सवासनस्यांतःकरणस्य कारणात्मनावस्थाने सति विश्रमस्थानं सुषु
प्त्यवस्था। कारणमात्रोपलंभः सुषुप्तिः तत्र जाग्रत्स्वप्नभोग्यपदार्थज्ञानाभावे
पि साक्षिकारं सुखाकारमवस्थाज्ञानाकारं चाविद्यावृत्तित्रयमभ्युपेयते। अहंकारा
भावाच्चानेकाविशिष्टावृत्तिः सुषुप्त्यभावप्रसंगात् वृत्तिरूपस्योपलंभस्याभावात्
न प्रलये ऽतिव्याप्तिः तत्र तत्कल्पनाबीजाभावात्। इह च सुखमहमस्वाप्सं न किंचि
द्वेदिषमिति सुप्तोत्थितस्य परामर्शात्। अनुभवं विपरामर्शानुपपत्तेश्च। अतः क
रणोपरागकालीनानुभवजन्यत्वाच्च। न तत्रोत्सुखाभावेपि स्मरणत्वानुपपत्तिः
स्मरणे तत्तोल्लेखनियमाभावाच्च। जाग्रद्व्यापारे स्वापेऽपि सुखानुभवानुपपत्तेर्लिंगा
भावनाश्रयाक्षेप्याच्चानुमानस्यासंभवात्। अहंकारस्याप्यस्थानसमयेपवानुभू
यते। सुषुप्तौ लीनत्वेन तस्याननुभूतत्वात्स्मरणानुपपत्तेसुखप्रतिबिंबाश्रयदे

स्वप्नजागरयोर्मध्यकाष्ठरूपस्याश्रयस्य अभिध्या ऽनुपस्थिता

स्या ४

भावा ४

भार २

भा

सि

47

सि॰बिं॥ २५

तीः नियमात्

पणेजपाकुसुमलोहित्यसाध्यासेरक्तं मुखमितिप्रतीतिवदहंकाराश्रयसाक्षिचैतन्य
स्यस्मरणाश्रयत्वादहमस्वाप्सुमितिसामानाधिकरण्यप्रतीतिः नपुनरहंसुखी
तिवदाश्रयतयास्मृतिसंशयविपर्ययाणांसाक्षिचैतन्याश्रयत्वानियमात्। अहं
कारस्यचप्रमाणजन्यज्ञानाश्रयत्वात्प्रमातृत्वेनैवतत्कार्यतावच्छेदादप्रमातृत्वावच्छे
देनचाविद्याया एवकारणत्वात्। अतएवानाप्तवाक्यादिजन्यपरोक्षविभ्रमोप्य
विद्यावृत्तिरेवेत्यभ्युपगमोवेदांतविदां। तत्रांतःकरणवृत्तिजनकसामग्रीसंप
त्तेपिप्रमातृत्वाभावापराधेनांतःकरणस्यासामर्थ्यात्तूनामादिषुब्रह्मध्यासस्यक्षु
द्राधीनतयात्मभ्रमप्रमाविलक्षणामनोवृत्तिरेव। कामादिवत्। तदुक्तं। अतएव
चोदनाजन्यत्वान्मानसीक्रियैवेषाध्यानमिति। एतेनतर्कस्यापिमनोवृत्तित्वं
व्याख्यातं। व्याप्यारोपेणव्यापकप्रसंजनात्मकस्यतस्येच्छाधीनतयात्मभ्रमप्रमा
विलक्षणत्वादिति। अतएवमनननिदिध्यासनसहितश्रवणाख्यवेदांतवाक्य
विचारस्यात्मव्योमंतव्योनिदिध्यासितव्यइत्यादिविधिरूपपद्यतेतस्यचतुर्वि
धान्वयव्यतिरेकादितर्करूपत्वात्। दृग्दृश्ययोरन्वयव्यतिरेकः साक्षिसाक्ष्यान्व
यव्यतिरेकः आगमापायितदवध्यन्वयव्यतिरेकः दुःखिपरमप्रेमास्पदान्वयव्य
तिरेकइति अनुवृत्तव्यावृत्तान्वयव्यतिरेकोपिपंचमः एतच्चसर्वेषांवेदांतानुकू

आपादनं

२५

।समन्वयाध्यायः१अविरोधाध्यायः२साधनाध्यायः३फलाध्यायः४ अध्याय एवं लक्षणमिति तुर्लक्षण।

तकर्णांचलुर्लक्षणीमीमांसाप्रतिपादितानामुपलक्षणमित्यभियुक्ताः विस्त
रवेदांतकल्पलतिकायामनुसंधेयः तदेवं सुषुप्त्यवस्थायामस्यानंदभोगः
द्रोक्ताचसुषुप्त्यभिमानीप्राज्ञइत्युच्यते। प्रकर्षेणाज्ञत्वात्तदानीं विशेषावच्छे
साक्षिनप्रसक्तज्ञानाद्यातदाचांतःकरणस्यलयापिलसंस्कारेणावच्छेदाल्लजी
भावप्रसंगेनवासार्वज्ञ्यापत्तिरीश्वराभेदप्रतिपादनंचशारीरेंद्रियाद्यभिमा
भावप्रसंगेनवासार्वज्ञ्यापत्तिरीश्वराभेदप्रतिपादनंचशारीरेंद्रियाद्यभिमा
रहितत्वेनोपचारात्संस्कारस्यचानिमित्तकारणत्वेनसाक्ष्याश्रितकार्यायाद
कोपावप्रवेशान्नतद्भेदपिसाक्षिभेदोजागरणेतु अंतःकरणस्यप्रमातृत्वाश्रि
कार्योपादानकोटौप्रवेशात्। तद्भेदेनप्रमातृभेदएव। साक्षिणएवच्चाधिको
धिविशिष्टस्यप्रमातृत्वान्नप्रतिसंधानानुपपत्तिरिति। मातृमानप्रभेदपिप्र
तदेहंनाभिद्यते साक्षी बाह्यार्थविषयस्मात्‌सआत्मेत्युच्यतेततः व्यभिचाराभि
ायप्रमात्राद्यैः स्वसाक्षिकैः सर्वमात्राद्यभावार्थसाक्षित्वान्नतथात्मनइति
र्तिककारपादैर्व्यवहारदशायामपिसाक्षिभेदनिराकरणात्सुषुप्तौतदुदकल्प
कर्वाचिन्महामोहएवत्स्यवधेयं। ननुदुःखैर्मखाप्यमितिकस्यचित्परामर्शात्
दुःखसामग्रीविरहेणतदभावात्। सुख
उषुप्तौदुःखानुभवोप्यस्त्वित्तिनः। तदानींदुःखसामग्रीविरहेणतदभावात्। सुख

मह२

सि०वि॥

२५

स्पचात्मस्वरूपत्वेनानिरूपत्वात्। शय्यादेरसमीचीनत्वेन च दुःखमित्युपचारात्।
दुःखमहमस्वाप्समिति प्रत्ययापपत्तिः अथवा अवस्थात्रयस्यापि त्रैविध्यांगी
कारात् सुषुप्तावपि दुःखमुपपद्यते तथाहि। प्रमाज्ञानं जाग्रज्जाग्रच्छुक्तिरजता
दिभ्रमो जाग्रत्स्वप्नः। प्रमादिनाश धीभावो जाग्रत्सुषुप्तिः एवं स्वप्नमंत्रादिप्रा
प्तिः स्वप्नजाग्रत् स्वप्नेपि स्वप्नो मया दृष्ट इति बुद्धिः स्वप्नः स्वप्नः जाग्रद्दशायां कथयितु
नशक्यते स्वप्नावस्थायां च यत्किंचिदनुभूयते। स स्वप्नसुषुप्तिः एवं सुषुप्त्यवस्था
यामपि सात्विकी या सुखाकारवृत्तिः सा सुषुप्तिजाग्रत्। तदनंतरं सुखमहमस्वा
प्समिति परामर्शः तत्रैव या राजसी वृत्तिः सा सुषुप्तिः स्वप्नः तदनंतरमेव दुःखम
हमस्वाप्समिति परामर्शोपपत्तिः एवं तामसी वृत्तिः सुषुप्तिसुषुप्तिः तदनंतरं गाढ

६५

मूढोमासमिति परामर्शः यथा चैतत्तथा वाशिष्ठवार्त्तिकामृतादौ स्पष्टं। एवमध्यात्मं विश्वः अधिभूतं विराट् अधिदैवं विष्णुः अध्यात्मं जाग्रत्। अधिभूतं सत्व
गुणः अधिदैवं पालनं। एवमध्यात्मं तैजसः अधिभूतं हिरण्यगर्भः अधिदैवं ब्रह्मा॥
अध्यात्मं स्वप्नः अधिदैवं सृष्टिः अधिभूतं रजोगुणः एवं अध्यात्मं प्राज्ञः अधिभूत
मव्याकृतं। अधिदैवं रुद्रः अध्यात्मं सुषुप्तिः अधिदैवं प्रलयः अधिभूतं तमोगुणः

२५

एवमध्यात्माधिभूताधिदैवानामेकत्वात्प्रणवावयवत्रयसहितानामनुपहितानां
मेतेषामैक्योपासनेया हिरण्यगर्भलोकप्राप्तिस्ततः करणत्रयविहारात्क्रममुक्तिरेव।
एतत्सर्वोपाधिनिराकरणेन साक्षिचैतन्यमात्रज्ञानेन तु साक्षादेव मोक्ष इति। त
देवं त्रयाणामप्यवस्थात्रयसहितानां विश्वतैजसप्राज्ञानामविद्यात्मकत्वात्। द्वय
त्वेन च मिथ्यात्वादनुपहितकेवलः साक्षी तुरीयाख्योऽहमस्मीत्यर्थः एवमेव व्यवहारतः
सर्वव्यवस्थोपपत्तेः परमार्थतः कस्यापि व्यवस्थाया अभावान्न काप्यनुपपत्तिः विस्त
रेण चैतत्प्रपंचितमस्माभिर्वेदांतकल्पलतिकायामित्युपरम्यते। ननु जाग्रत्स्वप्नाद्य
वस्थासहितानां त्रयाणामपि तदभिमानिनां मिथ्यात्वात्तत्साक्षिणोऽपि मिथ्यात्वस्या
दविशेषादिसाधारण्यविशेषाभिधानेन साक्षिणः सत्यत्वमाह। अपि व्यापकत्वाद्धि
तत्प्रयोगात्स्वतःसिद्धभावादनन्याश्रयत्वात्। जगत्तुच्छमेतत्समस्तं तदन्यत्तदे
कोऽवशिष्टः शिवः केवलोऽहम्॥१०॥ न दृष्टेर्द्रष्टारं पश्येरिति साक्षिणः प्रसक्त्यातोऽन्य
दार्त्तमिति श्रुतेः साक्षिणोऽन्यत्सर्वं साक्ष्यं जगत्तुच्छं। न तु साक्षी बाधावधित्वाद्भ्रमा
धिष्ठानतयाऽज्ञातत्वाच्च तद्बाधग्राहकाभावाच्चेत्याद्यनुक्तसमुच्चयार्थोऽपिशब्दः अ
थ यदल्पं तन्मर्त्यमिति श्रुतेः परिच्छिन्नत्वतुच्छत्वयोः समव्याप्तत्वात्सपरिच्छिन्नत्वानिर

सि॰ वि॰ ॥ स्यात्दुःखत्वनिवृत्तिरित्याह ॥ व्यापकत्वादिति सर्वं खल्विदं ब्रह्मेति सर्वात्मकत्वोपदेशे
न देशकालापरिच्छिन्नत्वादाकाशादीनां च देशकालपरिच्छिन्नत्वेऽप्यापेक्षिकमहत्त्वे
२८ न व्यापकत्वोपचारात् ॥ ननु सर्वव्यापकत्वेन नित्यत्वाद्भावरूपत्वाच्च आत्मा न दुः
खनिवृत्तिरूपः नापि सुखरूपः सुखस्यानित्यत्वेन नित्यात्मस्वरूपत्वानुपपत्तेः
तथा चास्य स्वरूपो मोक्षोऽपुरुषार्थ एवेत्याशंक्य नेत्याह ॥ हितत्वप्रयोगादिति ॥
हितत्वं पुरुषार्थत्वं ॥ तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादंतरतरं यदय
मात्मेति ॥ यो वै भूमा तत्सुखं एष एव परम आनंदः विज्ञानमानंदं ब्रह्मेत्यादिश्रुति
भिस्तस्य परमानंदरूपत्वोपदेशात्तस्य चानित्यत्वेऽपि लोके धर्मजन्यत्वं तद्गतः केरपा
व्यक्तिर्व्यंग्यत्वात्तदुत्पत्तिविनाशोपचारः अज्ञानव्यवहितस्य च तस्याप्राप्तस्य ज्ञान
मात्रादविद्यानिवृत्त्या प्राप्तिरिव भवतीति तदुद्देशेन मुमुक्षुप्रवृत्त्युपपत्तिः अध्यस्त
प्रपंचस्य दुःखरूपस्याधिष्ठानत्वात्स एवाभाव इति दुःखाभावरूपत्वेनापि तस्य
पुरुषार्थता ॥ ननु मोक्षसुखं संवेद्यते न वा ॥ नाद्यः तदानीं देहेंद्रियाद्यभावेन तद्व्यं
जकाभावाद्व्यंजकाभावेऽपि तत्संवेदनाभ्युपगमे संसारदशायामपि तथा प्रसंगात् ॥ २९
न द्वितीयोऽपुरुषार्थत्वापत्तेः ज्ञायमानस्यैव तस्य पुरुषार्थत्वात् ॥ अत एव शार्करात

द्वोऽजिनोऽखिवति वैष्णवमन्यानामुद्धार इति चेन्नैषाह। स्वतः सिद्धत्वादिति। स्वप्र
काशज्ञानत्वादित्यर्थः यद्यपि संसारदशायामविद्यावृतत्वादात्मा परमानंदरूप
तया न प्रथते तथापि तत्त्वविद्ययाऽविद्यानिवृत्तौ स्वप्रकाशतयाऽद्वयमेव परमानं
रूप२ दरूपेण प्रकाशत इति। मुख्यं जकापेक्षा। ननु सुखस्य स्वप्रकाशज्ञानरूपत्वेपि न
सरूपता ज्ञानस्य धात्वर्थरूपतया क्रियात्वेन साश्रयत्वात्। जानामीति प्रतीतेर्ज्ञानम
हमस्मीति प्रतीतेश्च तथा च कथमद्वैतवाद इत्याशंक्य नैषाह। अनन्याश्रयत्वादिति।
यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वांतरः सत्यं ज्ञानमनंतं ब्रह्म विज्ञानमानंदमि
ति श्रुतेः स्वप्रकाशज्ञानानंदरूपत्वात्। अंतःकरणतादात्म्याध्यासेन च तद्धर्मा
नाध्यासाज्जानामीति तदाश्रयत्वप्रतीतिः धात्वर्थमुत्पत्तिविनाशवत्त्वं चांतःकरण
वृत्तेरेवेति ज्ञप्तिरूपसुखज्ञानस्य सर्वाधिष्ठानत्वेनान्याश्रयत्वाभावान्नाद्वैतक्षतिः
तेन ज्ञानसुखात्मक आत्मा सत्यस्तद्भिन्नं च सर्वं जगदसत्यमिति सिद्धं। ननु सर्वस्य
जगतस्तुच्छत्वे तन्निषेधे नात्मसत्यप्रतीतिर्न स्यात्। नहि शशविषाणं निषिध्यते। क्वचि
निषेधाय ऽमिति क्वचिन्निषिध्यत इति न्यायात् तथा चानुपपत्त्यैव न जगतस्तुच्छत्वमिति नेत्या
ह। न चैकं तदन्यद्द्वितीयं कुतः स्यात् न वा केवलत्वं न चाकेवलत्वं॥ न शून्यं न चाशून्यम
द्वैतकत्वात्कथं सर्ववेदांतसिद्धं ब्रवीमि॥१०॥ एकत्वसंख्यायोग्यकं तदपेक्षाबुद्धिजन्य

तसंख्यायोगि द्वितीयं तत एकाभावे द्वितीयं कुतः स्यात्। द्वितीयं तृतीयादिनाम
पलक्षणं। नचैकमेवाद्वितीयमिति श्रुत्यैकत्वं प्रतिपाद्यते नेत्याह। नचाकेवलत्वं।
वलत्वं। एकत्वं चेत्तस्याविद्यकत्वात्। यद्यात्मन एकत्वं श्रुत्या न प्रतिपाद्यते तर्हि प्रस
दिमानवशादनेकत्वं स्यादिति नेत्याह। नचाकेवलत्वमिति। अकेवलत्वं। अनेकत्वं।
हनानास्ति किंचन। एकमेवाद्वितीय। अथात आदेशो नेति नेतीत्यादिश्रुतिप्रतिषिध्यः
हि सर्वप्रतिषेधात्। शून्यमेव स्यादिति नेत्याह। न शून्यमिति। असन्नेव स भवति
सद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुरिति। सत्यं ज्ञानमनन्तं
ब्रह्म। सदेव सोम्येदमग्र आसीदित्युपक्रम्य ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा
तत्त्वमसीत्यादिश्रुतिभिः सत्यत्वप्रतिपादनात् सर्वकल्पनाधिष्ठानत्वात् सर्वबाधा
वधित्वाच्च। ननु तर्हि सत्यत्वज्ञानत्वादिधर्मवदपि स्यान्नेत्याह। नचाशून्यमिति।
एकमेवाद्वितीयमिति पदद्वयेन सर्वप्रतिषेध्यप्रपञ्चकारणधर्मधर्मिभावादिभेदा
भेदप्रतिषेधात् सर्वत्र हेतुमाह। अद्वैतकत्वादिति। द्वाभ्यामितं द्वितं तस्य भावो द्वैतं। त
दुक्तं। द्विधेतं द्वितमित्याहुस्तद्भावो द्वैतमुच्यते॥ इति न विद्यते। द्वैतं हि यत्राभावो यत्र
तदद्वैतमित्यक्षरार्थः। सलिल एको द्रष्टाद्वैत इति श्रुतेः। प्रतियोगिज्ञानस्य बलाद्य
वेनाभावबुद्धौ कारणत्वात्। द्वैतस्यानिर्वचनीयत्वांगीकारणप्रसक्त्यादिवैघट्या

न्निषेधोपपत्तिरित्यर्थः तर्हि एतादृशा आत्मा गुणलिंगनिर्देशेन प्रतिपाद्यतामिति नेत्याह। कथं ब्रवीमि किमाक्षेपे। अद्वैतत्वेन वागविषयत्वात्। अवचनेनैव प्रोवाच। यतो वाचो निवर्त्तंते अप्राप्य मनसा सह। नाविज्ञाते विज्ञाता रं विजानीयादित्यादिश्रुतिभ्यः। वागविषयत्वेनैव वेदांतानां कथं तत्र प्रामाण्यमिति चेत्। अविषयेप्यात्मनि तदाकारवृत्तिमात्रेण तदविद्यानिवर्त्तकत्वादित्याह। सर्ववेदांतसिद्धमिति तथा च श्रुतिः यस्यामतं तस्य मतं मतं यस्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां। यन्मनसा न मनुते येनाहुर्मनो मतं। तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्यादिरविषयत्वमात्मनो दर्शियति। तदेवं वेदांतवाक्यजन्याखंडाकारवृत्त्याविद्यानिवृत्तौ तत्कल्पितसकलानर्थनिवृत्तौ परमानंदरूपः सन्स्वस्थस्तिष्ठत्यात्मा भवतीति सिद्धं। ।

संस्तौमि तं व्यासमशेषमर्थं सम्यक् सूत्रैरपि यो बबंध। विनापि तैः संप्रथिताखिलार्थं तं शंकरं नौमि सुरेश्वरं च॥१॥ लघुरपि बह्वर्थवहः चिंतामणिरिव निबंधो यं। मधुसूदनेन मुनिना विहितो गुणिना विनोदाय॥२॥ यदत्र सौष्ठवं किंचित्तद्गुरोरेव मे न हि। यदत्रासौष्ठवं किंचित्तन्ममैव गुरोर्न हि॥३॥ बहुयाचनया यया मयाल्पो बलभद्रस्य सतेः कृतो निबंधः। यद्दुष्टमिहास्ति यदुष्टं तदुदाराः सुधियो विवेचयंतु॥४॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरभगवत्पूज्यपादशिष्यश्रीमधुसूदनमुनिविरचितः सिद्धांततत्त्वबिंदुः समाप्तः। श्रीराम।

[OrderDescription]
,CREATED=16.10.20 11:05
,TRANSFERRED=2020/10/16 at 11:12:56
,PAGES=55
,TYPE=STD
,NAME=S0004035
,Book Name=M-1787-SIDHANT BINDU
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,